नं: ९९-घ

दुर्घटवृत्तिप्रति संस्कार:

पत्राणि ४९

नं: ६६ - घ

दुर्घटवृत्तिप्रतिसंस्कार:

पत्राणि ४६

वृत्तिप्रतिसंस्कार:

नं०: ६६ – घ

दुर्घटवृत्तिप्रतिसंस्कारः


पत्राणि ७६

व्याकरण

१४७ दुर्घटवृत्ती
२२..

पुस्तकमिदं रामचन्द्रपाठ
कीयम् पत्राणि ४९





दुर्घ॰वृ॰ श्रीगणेशाय नमः॥ नत्वाशरणदेवेन सर्वज्ञंज्ञानहेतवे॥ वृद्धदुर्जनांभोजेकोशवीकाशभास्वता॥ शाकमहीपतिवत्सरमाने एक
१ नभोनवपंचविताने। दुर्घटवृत्तिरकारियुदेवः कंठविभूषणहारलतेव २ वाक्यात् शरणदेवस्य छात्रोपग्रहपीडया॥ श्रीसर्वर
क्षितेनैषा संक्षिप्य प्रतिसंस्कृता॥३॥ क्ङितिच। कथं हृङ्कारेश्छंदसीति। कृधातोरिति· गुणनिषेधात् उच्चारणार्थोकारेण।
नंगला गुणाभावात्। उच्यते अत एव निर्देशादिति रक्षितः। शाबंतस्यैकदेशोच्चारणार्थेकारेण वा निर्देशः। कथं निसंतुंद
परिमृजः। तुंदशोकयोः मृज। पनुदोरिति कप्रत्यये मृजेरजादेसंक्रमे विभाषा वृद्धिरिष्यते इति वृद्धिप्रसंगात्॥३॥ व्यवस्थि
तविभाषया न वृद्धिः। अचीति वाच्ये अजादिग्रहणं मुख्याजादिपरिग्रहार्थं। तेन तुंदपरिमृज इति तत्रैषुः। अयमाशयः। यस्मिन्
विधिरित्यादिना यद्येक्षिद्धे आदिग्रहणात् द्विर्वद्धं सुवद्धं न भवती सज्जादिरेव ग्राह्यः। कप्रत्यये अनुबंधसत्वे अजादित्वंच। मा
र्जंतीत्यत्र लादेशस्याजादित्वमेव। एकमुनिमतेऽचो ञ्णितीत्यत्राच इति योगविभज्य मृजेर्वृद्धिर्जरायाजरसन्यतर
स्या तस्यामित्यस्मादन्यतरस्यांग्रहणानुवृत्तेर्व्यवस्थितविभाषात्र व्याख्यासेउक्ता॥ रक्षितेन धातुप्रदीपे तुंदपरिमृजं स्तुंदपरिमा
र्ज इत्युभयं दर्शितं। भाष्ये तु व्यवस्थितविभाषा अनुक्तत्वात् उभयप्रयोगो लक्ष्यते। कथं जिघ्नुः। कृत्वाजिस्थश्च क्स्नुरित्यत्र स्था
स्नुक्षिप्रयोगे छ्वायं न किदिति व्याख्यातं॥३॥ गकारप्रश्लेषादत्र सूत्रे वृत्तिः। तदुक्तं। स्नोर्गित्वान्नस्य ईकारः। किंतोपिलशास
नात् गुणाभावस्त्रिष्णु स्थार्थः श्रुको निट्स्वंकगोदिनोः। अन्ये तु स्थास्नुक्षिप्रमे स्था आ इत्साकारप्रश्लेषात् घुमास्था
गेति नेत्वमितिवर्णयंति। किं त्वा गुणाभावमाहुः। किं त्वेकदेशो छंदस्युपसंख्यानमिति रक्षणवः पशावइति न सिध्यति। अ
नुनासिकलोपप्रसंगात्॥३॥ सर्वे विधयश्छंदसि विकल्प्यंत इत्यसद्दोषः। तुल्यास्यप्रयत्नं सवर्णं। कथं प्रक्लृप्यमानः। अ॰ १

कारलृकारयोः सवर्णसंज्ञा वक्तव्येति सवर्णाच्चेति णत्वप्रसंगात् ॥३॥ उरिति वक्तव्ये वर्णग्रहणस्यानित्यत्वार्थेन । यद्वा ॥ ॠलृगि
त्यत्र प्रत्याहारे लृग्रहणं न शक्यं कर्तुं सावर्ण्यादृकारऋकारयोर्ग्रहणादिति तथा लृकारमपि ग्राहयिष्यतीति किं लृकारेण तत् ज्ञापय
ति ऋकारलृकारयोः सावर्ण्यमनित्यमिति तेन यथा कॢप्त इत्यत्र गुरोरनृत इति प्लुतो भवति । न लृत इति प्रतिषेधः । तथा प्र
कॢप्यमान इति णत्वाभावः ओत् । कथमगौर्गौः सं— घ्रत इति गोभवन्निति मंतव्यान्निपात्यंते । अनेन प्रगृह्यत्वात् पूर्वरूपाभावा
त् ॥३॥ ध्वंते · अध्यारोपितगोत्वाद्गौणत्वं । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति याध्यागोरनुबध्नीयोऽग्निष्टोमीय इत्यत्र वाही
को नानुबध्यते । एवं गौर्वाहीक इति वृध्यत्वेन स्यातां ॥३॥ पदस्का वाहीकार्थानपेक्षया वृद्ध्या लभेय विष्यत इति भाष्य भागवृत्ती ।
न व कुब्रीहौ । कथं लवकासितको मकासितक इति बहुव्रीहौ सर्वनामत्वाभावादकचोऽप्रवृत्तेः ॥३॥ गोनर्दीय मतेनांतरंगत्वा
दकच् । यदाह । अकच्स्वरौ तु कर्तव्यौ · प्रत्यंगौ मुक्तसंशयौ । विति प्रत्यंगावंतरंगा इति अनुन्यासः । मत्तु वृत्तावुक्तं लवकासि
तको मकासितक इति · बहुव्रीह्यर्थे वृत्तत्वात् समासकाल एव च निषेधादकचोऽप्रवृत्तेः प्रागिवात्क एव भवति । तथा च भाष्यं
विधिनिषेधौ समानकालाविति । विभाषा । कथां मध्यं द्वये पापमपि मे दिलीभता मिति माघः । द्वयशब्दस्य समस्येव सर्वनाम
विकल्पात् ॥३॥ मवास्थितविभाषया ग्यत्रयीष्यते । अथवा ईषगतविस्मृतः क्विपि द्वयं द्वैतं गच्छंतीति द्वयेषः तेषां । सर्वा
दावुभयशब्दः पठ्यते तस्यार्थग्रहणात् द्वयशब्दस्यापि सर्वादित्वमित्यन्वयः । अचः । कथं वैयाकरणः न य्वाभ्यां पदांता
भ्यां पूर्वौ तु ताभ्यामैजिति वक्तव्ये यणः स्थानिवत्वात् मकारपूर्वत्वाभावादैच् न स्यात् ।३। यो ह्यनादिष्टादचः पूर्वस्तस्य
विधिं प्रति स्थानिवत्वात् इति न स्थानिवत्वं आसिद्धपरिभाषया अंतरंगे आयादेशे कर्तव्ये बहिरंगस्यैवो असिद्धत्वादिति

न्यासः। कथं भवतीति निमित्तापेक्षो पूर्वत्वे ओकारस्य स्थानिवत्वात् अवादेशप्रसंगात्। यथा तन्वंतीत्यत्र उभावः। उनिमित्तापेक्षं पू
र्वत्वं लक्ष्यवशात् क्वचिदेव। तन्वंतीत्यत्र। सिद्धपरिभाषया वा इउभावः। द्विर्वचने। कथमधिजगे इङ आदेशस्य स्थानिवद्भावात् इकारस्य
द्विर्वचनप्रसंगात्। ङगाङ्किटीत्यत्र लिण्मात्राश्रयत्वादंतरंगत्वात् प्राक् प्रवर्त्तते। पश्चादेशस्तु लिडादेशविशेषाश्रय इत्युभयाश्रयो
बहिरंगः। एवं च द्विर्वचननिमित्ते विना—मजादेश इति कुतः स्थानिवत्त्वमिति न्यासः। कथं निन्यतुः प्रागियङि द्वित्वे हि निनियतु
रिति स्यात्॥ उ॥ उपजातनिमित्तोप्युत्सर्ग उपजनिष्यमाणनिमित्तं नापवादेन वाध्यते इति यणा वाधितत्वान्नेयङ्। भाष्यभा
गवत्सोस्त्वे तदर्थिनेत्यनुवृत्तौ द्विर्वचननिमित्तेऽचि द्विर्वचन एव कर्त्तव्ये अजादेशो न भवति। कृते द्विर्वचने यथाप्राप्तमजादेशो भ
वतीति सूत्रार्थः। अदर्शनं। कथं वृक्षः प्लक्षः विसर्जनीये रेफस्यादर्शनात् लोपसंज्ञायां ढ्रलोपे पूर्वस्येति दीर्घसंभवात्। न च
लोपभावितस्य संज्ञा वादिलोप इत्यत्र यथार्थो गम्यते न चादिशब्दः प्रयुज्यते साचादिलोप इत्युक्तं तथा ल्यब्लोपे कर्मण्युपसं
ख्यानमित्यत्र च गम्यमाने ल्यपि लोपशब्दः प्रयुक्तः। उ। सामर्थ्यादौपचारिको गौणोत्र लोपशब्दः अथवा ढ्रयोर्लोपो यस्मि
न्निति बहुव्रीहिः कार्यः अवसानस्याभावरूपत्वान्नपरत्वं एवमपि वृक्षस्तिष्ठतीत्यत्र प्रसंगः किंचावसानस्यापि बुद्धिकल्पितं
परत्वमस्त्येव वर्णानां परत्वं वौक्रमेवउच्चरितप्रध्वंसित्वात्। एवं तर्हि ढ्रलोपसाहचर्यात् रोरीति रेफलोपो ग्रास्यः वृक्षस्तिष्ठतीत्य
त्र तस्मिन्निति निर्दिष्टपरिभाषया विसर्जनीयव्यवधानादपि दीर्घाभावः। प्रत्ययलोपे। कथं भवतीति क्विपोऽदर्शने लोपसंज्ञा
यां प्रत्ययलक्षणेन तिवर्णस्य तुक्प्रसंगात् न च लोपश्रुत्या विहितस्य प्रत्ययलक्षणं यतः आयादय आर्द्धधातुके वा इत्यत्र न्यासउ
क्तं। आयादीनां पक्षे निवृत्तिः प्रवृत्तिर्वा तत्र यदि वाग्रहणेनायादीनां निवृत्तिः स्यात्तदा प्रत्ययलोपलक्षणेनाप्रत्ययादिसकारः २

स्यादिति। तथा। दर्शनमात्रे त्रपुजतुभ्यां स्मोर्लुकि कृते क्विपः प्रत्ययलोपलक्षणेन नुकमाशंक्य न्यासकृता ऽस्या। निवृत्तस्त्रा स्थानि
ग्रहणमनुवर्त्स्यानात्र प्रसंगवानिति प्रसक्तस्यादर्शने प्रत्ययलक्षणमुक्तं। धात्वधिकारात् क्विपो प्रसंगे नुगभाव उक्तः। ननु यदि
प्रत्ययप्रसंगे प्रत्ययलक्षणं तदा ग्रामणीरित्यत्राण्प्रसंगे सत्यलघूपधवृद्धिः स्यादिना क्विपि प्रसक्तस्याणः प्रत्ययलक्षणेन वृद्धिः स्यात्।
।।उ।। पूर्वमपवादाः प्रवर्त्तन्ते पश्चादुत्सर्गा इत्यणप्रसंग एवात्र नास्ति कथं गोहितं। प्रत्ययलक्षणेन चतुर्थ्येकवचनाश्रयावाद
ेशात्।उ। प्रत्ययलोपे तल्लक्षणमिति वक्तव्ये प्रत्ययग्रहणेन ज्ञापितं वर्णाश्रयविधौ प्रत्ययलक्षणं नास्तीति तेन गवे हितं गोहि
तमिति नावादेशः। यद्येवं कथमत्तणे डितिलोपे दृत इति मुदित्यत्र क्विपि वलाद्याश्रय इट् स्यात्।उ। शास इदङ्हलोरित्यत्र
न्यासउक्तं परिभाषेयमनित्येति। नलुम। कथं अभिमुखमुपयातिमास्माकं चित्ताभिधाः। पटले मधुव्रतानां मधुसुखमु
खानुगंधलुब्धेरधिकमधिलदनेनेमानिपातीति माघः लव्यधीत्यव्ययाभावे स्वादेर्लुकि लदादेशाभावात्।अ इकोऽ
चि विभक्तौ। वित्यत्राच्ग्रहणेनास्यानित्यत्वज्ञापनात् प्रत्ययलक्षणेन लादेशात्। लदिति विभक्तिरूपकमव्ययं लव्यर्थ इति
वाच्येस्तु सर्वादौ लदिति पठ्यते तावन्यार्थौ।। ।।शरणदेवस्य दुर्घटवृत्तौ प्रथमः पादः।।१।। ।।गाङ्।। कथं धवित्रं व्यजनं अ
त्रिलघूरस्यादिना इत्र चिधू विधूनन इत्यस्य कुटादित्वाद्गुणाभावात्।उ। आतिदेशिककार्यमनित्यमिति धातुप्रदीपटीका
।वाकुलकादिति केशवः। कथं लेखनं लिखितव्यं इत्यादि। कुटादित्वाभावात्।उ। ओरोदिति कर्त्तव्ये ओर्गुणे इति गुणग्रहणे
न ज्ञापितं संज्ञापूर्वको विधिरनित्यः। तथा कुट आदि कुटादिरित्येकशेषे पांतर्भावात् लिखेः कुटादित्वं। कथं तर्हि मषिप्र
सूले खनीति।उ। अपाच्चतुष्पाच्छकुनिष्वालेखन इति निर्देशात्। एवं विलेखने इति निर्देशाच्च। भवेः कुटादित्वमनसीति वक्त

दुर्घ० वृ०

२

३

यंकथं विव्यचिथेतिसंप्रसारणप्रसंगात्।उ। अनसीतिपर्युदासात्· तिङो ङित्वाभावात् इति धातुपारायणे धातुवृत्तौ तु सामान्य
माश्रित्य विविचिथेति उक्तमिति रक्षितः।। विजा। कथमुद्वेजिता दृष्टिभिराश्रयत इति कुमारः।उ। ण्यन्तादिति भागवृत्तिः प्रकृतिग्रहणे
ण्यधिकस्यापि ग्रहणमिति चङ्· विषयो यं न माभूधूकमिगमिद् इत्यादौ ण्यन्तानां च भादीनामुपसंख्यानमिति वचनात्। णिच्यन्तरं
गत्वात् पूर्वं प्रत्ययात् गुण इति असंयोगात्। कथं नसंपद्येत गमनायसत्वरेति माघः। संयोगान्तत्वात् किलाभावात्।उ। अपशब्द एवा
यं। अथवा प्रज[redacted]यावपत विश्वप्रथ्वरक्षो न ङितिनजो ङित्वेनागमशासनानित्यत्वात् तु कोऽभावे किलात्वंप्रसारणे कृते छ
कारा अपत्ययक्। इंधि। कथमक्तेभूभावे कृते वभूवेति भवतीति क्तिपा निर्देशात्।उ। नित्यशब्दात्वाख्याने त्वक्तेर्भूरित्यनेना
क्तेः प्रसंगे भवतेः प्रयोगः साध्यते अथवा भवतेरइत्सत्रयदुक्तमनुभासकता अवश्यं हि यमाकयाद्यक्या निर्देशः कर्त्तव्य
इति भूव्यक्त्यानिर्देशः कृता कोत्र प्रद्वेषः। हलंता। कथं दीदक्षते दिसक्षते किलात्सरत्वात् स्मजेदृशो र्झल्यमकिती सम्प्रसा
त्वा।उ। पूर्वविप्रतिषेधा। किलं। निष्ठा। कथमुड्डयितः उडोत्रापाठात् अकित्वाभावात्।उ। भौवादिकस्यडीङो निष्ठायामकिल
मिति धातुपारायणः। दैवादिकङीङः ओदितां मध्ये पाठसामर्थ्यादनिट्त्वं न लंचते नोडीन इतिरत्नो। कथं नित्यं कुटिलापरत्वा
दनेनैव विकल्पितत्वात्।उ। पूर्वविप्रतिषेधेनान्तरंगत्वाच्च कुटादित्वमत्राद्रस्वो।। कथं वनायवनेभ्य इति दीर्घत्वेत्वयोः कृतयोर्ह्रस्व
त्वप्रसंगात्।उ। अस्ति ह्रस्वबहिरंगमन्तरंगे इति ह्रस्वे कर्त्तव्ये दीर्घादेरसिद्धत्वात् अथार्थधर्मस्य नपुंसकलिंगस्याश्रयणात् ह्रस्वो
पि वाहिरंगः एवं तर्हि परस्मैपदेष्विति निर्देशान्न ह्रस्वः वने इति। द्वितीयां तस्य सप्तम्यं तस्य च पूर्वं प्रसतवत्वेन ह्रस्वत्वउद्रिक्तक
र्मादिशाक्तिकत्वेनानपुंसकत्वात् प्रथमा द्विवचनस्य तु अर्थवस्त्वात् उदिस्यतऽप्रातिपदिकग्रहणानुवृत्तौ पुनः प्रातिपदिकग्रह २

णात् निष्कृष्ट प्रातिपदिकाश्रयणात्। अपरं बहुलाल्लोक्तं। गोस्त्रियोः। कथमर्द्धपिप्पली· एकविभक्ति चेत्युपसर्जनत्वे ह्रस्वप्रसंगात्।
उ। एकविभक्तावषष्ठ्यंतमिति· कात्यायनवार्त्तिकेनोपसर्जननिषेधादिति भाष्यं। एकविभक्ति चेत्यत्र विभाषानुवृ
त्ते र्व्यवस्थितविभाषत्वादिति न्यासः। उभयगतिरिह शास्त्रेसंभवतीति लौकिकोपसर्जनत्वान्न ह्रस्वः। शास्त्रीयोपसर्जन
स्य लौकिकोपसर्जनस्य लौकिकोपसर्जननिरसर्थं यत्न सामर्थ्यात्। ह्रस्वे च परवल्लिंगतया स्त्रीप्रत्ययः प्रसज्येत इत्यनु
न्यासः। अस्मदो। सविशेषणानां प्रतिषेधो वक्तव्य इत्युक्तं। कथं पुनर्नैवयं वैयाकरणा इति। उ। इश्वरादिवदेकत्वे बहुत्वा
रोपात्। फल्गुनी। कथं पुनर्नैवयं वैयाकरणा इति। उ। पूर्वाफाल्गुनीनक्षत्रं। द्वित्वबहुत्वादिदेशात्। उ। पूर्वोत्तरे फाल्गुन्यौ द्वे
प्रोष्ठपदे च द्वे इत्यत्र सूत्रे बहुवचननिर्देशात् बहुत्वं विवक्ष्यते· द्वयोरित्यनुवृत्ते र्द्वित्व एव बहुत्वारोपात्। इयं त्वेकार्थातिदेशि
कं कार्यमनित्यमिति वा वाच्यं। पुमान्। कथं भवश्च भवानी च भवौ रुद्राविल्यादि। तल्लक्षणश्चेदेव विशेष इत्यनुवृत्ते रस्ति
इह हि पुंयोगकृतो भेदः। इंद्रेन्द्राण्यावित्यत्र प्रत्युदाहृतं। उ। पुमान् स्त्रियेत्यत्र न्यासकृता पुमानिति योगविभागः कृतो स्यसि
द्धिः यद्यप्यानुकूपुंयोगमपेक्षते। तथापि स्त्रियां विधाना स्त्रीकृत एवायं भेदः। कथं दासीदासं कुटीकुटं उ। गवाश्वादिषु पाठ
सामर्थ्यान्नैकशेष इति न्यासः॥ ॥इति दुर्घटवृत्तौ कृदादिपादः॥ ॥भूवा· उप· कथं भवतीति· उकारस्येत्संज्ञाप्रसंगात्। उ। निर
नुनासिकत्वान्नेत्संज्ञा। प्रतिज्ञानुनासिक्याः पाणिनीया इति। प्रयोजनाभावाद्वा। न च स्वरति सूतीत्यादिनाइड्विकल्पः प्रयोजनं
। भूसत्तायां परस्मैभाषा उदात्त इति उदात्तोपदेशानर्थक्यात्। तन्निरसमिडर्थं। तवगाप्रभृतीनामिवोदात्तत्वमनुदात्तनिरसर्थं
वाच्यं निरर्थकत्वादनुदात्तत्वाप्रसंगात्। हलं। कथं पुष्टिः अनेन हि षकारस्येत्संज्ञया भाव्यं। तथा च पुष्णीतीत्यादिना सिध्यति। उ।

दुर्घ०वृ० अनभिधानान्नेत्। एवंप्रयोजनाभावान्नेत्वं। कथंअटतीत्यादिअनेनेत्वेटकारलोपात्प्रयोजनंतुटित्वात्ङीप्। यथानास्ति
४ कास्तनयोर्लघिटोरित्यत्रोक्तं स्तनंधयीधेटष्टित्वात्ङीप्।३। एवमादीनामकारइत्संज्ञापरित्राणार्थो नोच्चारणार्थः। यथा
५ इदमः स्थमुः इत्यत्रोकारः। कथंभवतीतिवकारस्येत्वप्रसंगात्।३। प्रयोजनाभावान्नेत्वं। नचयुवांतो पिप्रसर्ये इति प्रयोजनं
विशेषणं। अन्यथागम्यतिनाम्यतीत्यत्रपांतादेशोपि स्यात्। यतोवांतोपीत्यत्र यांतोपीतिकर्त्तव्यं स्यात्। नावि कथं। क्वायजेय
इति किमोत् इटोअदित्यत्रस्याऽनिवन्नावात् अनेनेत्वनिषेधात्।३। अनित्सत्वादस्य विधेरितिवृत्तिः। इटोअदित्यत्रोक्तं। नाय
मादेशावयवस्तकारः। किंतर्हि मुखसुखार्थंउच्चार्यते। एवंचानित्सत्वात्अस्य विधेरित्यत्रायमर्थो वेदितव्यः। किमादित्यत्र
अनित्सत्वात्। इटोदित्यत्रास्य विधेरकारविधानादिति कश्चित्। यथा। कथंभवतीत्यत्राकादेशः कस्मान्नभवति। यथासं
ख्याभावात्तद्विदिशेनुच्चारणार्थत्वात्। श्रुतानुमितन्यायाच्च श्रुतयोर्देशानुदेशिनोर्युक्तं। यथा तूदीशलातुरेत्यादौ।३।
श्रुतन्यायफलस्य अंतरंगस्यानित्सत्वात् दिशेः प्रतिपादनवृत्तित्वाच्च सामान्येनयथासंख्यंपरस्मैपदानामित्यादौ यथा
संख्यार्थस्वरितत्वसामर्थ्याद्वातथाचाक्षितः स्वरितत्वासामर्थ्यात्क्वचिदर्थतः क्वचित्शब्दात्सामान्यमाश्रीयते इतिए
वंचपरस्मैपदादिसंज्ञानुमितस्यतिप्तसादेर्यथासंख्यंणत्वादिः एकाद्विबाद्यभिधानान्नारत[redacted]म्याच्च। लुटः प्रथमस्येत्यत्र
प्रथमसंज्ञानुमितयोः रूरूवत्वोः। ङ। सिङ सोश्च्येत्यत्र एकारोकारयोः।३। अस्यदित्वान्नात्र यथासंख्यं। अ[redacted]आंतर थवा
तम्यादस्यावादयो भविष्यंति। तथाहि। एकारादीनां संध्यक्षरत्वात्। अकारइकारात्मक एकारः। अकारउकारात्मक ओ
कारः। अकार एकारात्मक ऐकारः। अकार ओकारात्मक औकारः। एवंच संवृताकारवत् एकार ओकारस्य वायवो विवृता ४

कारवतएकारस्य अकारस्य वा यावो भविष्यतः। तदुक्तं संवृताकारस्य संवृताकारो विवृतावर्णस्य विवृतावर्ण इति। ननु कथमेतत्। य
तो वर्णेषु ये वर्णैकदेशा वर्णांतरसमानाकृतयस्तेषु तत्कार्यं न भवतीत्युच्यते।ऽ। संध्यक्षरं वर्जं हित्वा संध्यक्षरेषु प्रयत्नभेद एव
वतथा एऐओऔ जि सूत्र ग्रहः हरिः। संध्यक्षरेषु विशमोपादानाभ्यां लक्ष्यः पृथक्भाव इति। अत एव एऐ कंठतालव्यौ ओऔ कंठो
ष्ठ्यौ इति कालविशेषाभावे पि पृथक्प्रयत्नत्वात्। हे गौरि सूत्र न संबुद्धि लोपः। अस्तु। कथं। कर्णपुटं मया सक्तं भग्नो दंतस्तथै
व च। एष कालः क्षमुत्सनः यः पलाति स जीवति। पलायत इति स्यात्।ऽ। पलगतौ विसस्य लेट्यिआडागमे रूपं। छांदसा अपि भा
षायां क्वचित्प्रयुज्यते। अध्वर्यु शब्देन क्वाछंदसीति वा कर्त्तव्ये भूवादौ ध्यै चिंतायामिति ज्ञापकात् गणकार्यमनित्यमा छपो भा
वे रूपं लोपो व्योर्वलीति यलोपे पलातीति। कथं मुच्चु कुटिषतीति। कुटादिलेनसनो ङित्वात् लङ् प्रसंगात्।ऽ। उपदेशाधि
कारादिति गाङ् कुटादौ न्यासः कथं तर्हि वो भूयते तपसः परस्मैपदं चेति ज्ञापकात् सनाद्यंतानामप्युपदेशो स्तीति ज्ञापकं सं
मुच्चयः। सचास्मुरुः भावकर्मण्यात्मनेपदनिवृत्त्यर्थत्वात् ततश्च पुच्छभांडचीवरा। ङि इति ज्ञापकं। कथं क्षिज दावद्यु भग्न
गेरिति मेघः णलाचक्षिङो युजर्थमात्मनेपदार्थमिकारानुबंधे कर्त्तव्ये घनुबंधकरणं ज्ञापयति। अनुदात्तङित आत्मनेपदमनित्य
मिति रोमंथ तपोभ्यामिति सूत्र तपसः परस्मैपदं चेत्यस्य प्रसाख्यानं न्यासकृतोक्तं नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामित्य
तोन्यतरस्यांग्रहणानुवृत्तेर्व्यवस्थितविभाषाविज्ञानादात्मनेपदमनित्यमिति प्रपंचकाशे स्यंदकुशो स्यंदत्वं शत्रुमस्तके। अस्मा कं
तु तथा स्यंदयथा स्यंदास्ति फेनवे। तथा नावं समृद्धमपि सेवति नीच एव दूरेण तं परिहर। ति पुनर्महांतः अत्युक्तमप्यूहति प ङितो ज
नः लभंति पुनरुत्थानं तवोपसाभिकायावद्राक्षस्य लपं। तिनः। त्राहि मामुरुङ्खितं त्राहि मां हे तथागत। त्राहि इत्यत्रेदमपि वा।

उर्घं० ९० च्यं। त्रायते इति त्राः अन्येभ्योपि दृश्यत इति विच्। तत आ चारे क्विपि धातुत्वे लोटि रूपमां त्राहि। त्रातेवाचरतीत्यर्थः। तथा मंडपेशमामिति कि
५ मतः परमिति गणकाव्यानि सत्वात् लुपो लुग्भावे आ दध्याद् धकारे इति शायनामावहन्नवीक्ष्यमाणामिति मयूरः॥ दध धारण इत्यस्य
5 धातोर्नायं प्रयोगः। आशिष्यार्थ धं धातुकत्वे आदध्यात् दधः ततश्चाचारे क्विबंतादाशी। लिङ्या कारलोपे यासुटि रूपं। तथा सर्वमा
पोमयं जगदिति चंडिकायां। सर्वं जगदापोमयमिति विलोक्य इति व्याचक्षाणः। अयमयतये त्यादि दंडकाल्लुङि रूपमाहुः अत्र नका
रस्यच्युतत्वेन अकारः अन्ये त्वापः शब्दं सकारांतमाहुः। यस्यायं वैदिकः प्रयोगः अपोभिर्मार्जनं कृत्वेति तथा च कोपः कमनं सलि
क लं भुवनमुदकं पार्वनीरकबंधपयः वनवारिजीवनाज्जलात्स्तुवते कतमे पिनपुंसकमापइति व्याख्यानांतरं बहुलान्नोक्तं। तथा
प्रसूषकाले जगदंगनानां मुखे भुकामः प्रतिजंभतीति माता शत्रुः पिता वैरी येन बालो न पाठितः। न शोभति सभामध्ये हंसमध्ये
वको यथा। अरिमित्रमुदासीनं मध्यस्थं स्थविरं गुरुं॥ यो न बुध्यति मूढात्मा सर्वथा सो विनश्यतीति। तथा परिष्वजातिपंचालीम
ध्यमं पांडुनंदनमित्यादि। स हंतु कथं दुर्वारं भारमित्याध्वषीयस्य सहेः। तथा ग्रसति तव मुखेंदुं चंद्रबिंबं विहाय। पिंडं ग्रसतीति पिंड
ग्र इति। अलमंतस्ये सत्र वर्त्तो ग्रवस्तु ग्रहण इत्याद्यष्षीयस्य रूपमिति रक्षितः। कर्त्तरि। कथं संपद्विनियमेनौ औ दधत्तु भुवनद्वयामि
ति रघुः॥ प्रतिषेधे हसादीनामुपसंख्यानमिति रक्षितः। अत्रादिशब्दः प्रकारे सादृश्ये च। तच्च प्राप्तालने पदाभावत्वेन नतु शब्द
क्रियत्वेनापवं न दुःखं भागवृत्तिकृता प्रकाशस्तु शब्दक्रियात्वादिति तन्न। विनिमयशब्देन कर्त्तव्यतिहारस्योक्तत्वादिति तु नवा
च्यं। इतरेतरान्योन्योपपदाश्चेति वचनात्। अपशब्द एवायमित्यनुन्यासः। ततः संप्रहरिष्यंतो दृष्ट्वा कर्णधनंजयाविति अत्र न क
र्मव्यतिहारो विवक्षितः किं तर्हि युध्यमानाविति केय्यटः नेर्विशः कथमंके निविशती भयादिति रघुः॥ नेरूपसर्गे शब्दास्य ५

ग्रहणं मधुनिविशंतीति माद इत्यर्थः। इह तूपसर्गप्रतिरूपको निपातः पदसंस्कारश्रमणाद्वा। आङो। कथं किं माद्यसे विहंगवदनं। उ। कर्त्र
भिप्राये भविष्यति। एवं च भुजामुद्वृत्तियमभुंक्त वेदितुमिति भारविः भुजेरभ्यन्तरपात्रेष्विति वक्तव्यं। स्वराद्यन्तोपसृष्टादिति भयं नियमात्के व
लात्। तङो भावत्। क्रीडो। कथं शालकामष्टिभागः स्वतनुवनसहितः। क्रीडते नागराज इति प्रयुक्तत्वं वंते। उ। अपशब्द एवायं। क्रीडतइतिपा
ठेवा। वार्तिकसमुच्चयार्थं चकाराद्वा। शप उपालंभ इति वक्तव्यं। कथं सख्यः शप्याभिमद् इ किंचिदपि स्मरामि। उ। चकारसंगृहीतस्यास्यन
पुंसकमनपुंसकेस तोन्यतरस्यां ग्रहणस्यानुवृत्तेर्व्यवस्थितविभाषात्वेनानित्यत्वात्। वाचाशरीरस्पर्शनायोगाद्वा। भोगवृत्तौ तु उप
लंभनं प्रकाशनमुक्तं। एवं च सर्व एक एव सिद्धान्तः। आशिषि। कथं नाथसे किमु पतिन भूभृतामिति भारविः। उ। आशिष्येव नाथ इ
त्यात्मनेपदनियमार्थं न किं तर्हि अनुदात्तेल्लक्षणात्मनेपदानित्यत्वात्। नित्यात्मनेपदार्थं तेन आशीर्विषयादन्यत्र विकल्पः रूपाप्य
तीति काश्चिन्नाथस इति वा पाठः कर्तव्यः। एवं नाथमानमनुनाथे विजहाहि संगरारंभरसम्पि। अथ सा संगरारंभमस्जेति लामाशास
इत्यर्थः। हरतेर्गतिताच्छील्ये इति वक्तव्यं। कथं जलधिमनुहरते स्मरः। उ। गतिताच्छील्य इति भागवृत्तिः। गतविधप्रकारास्तुल्या
र्था इति भर्तृहरिः। तेन सादृश्यशीलने तङ्। वृत्तिकारमतेन तु कर्त्रभिप्राये भविष्यति। उदो नूर्ध्वे। कथमुत्तिष्ठते वा मुक्तिनापि इ
ष्ट इति प्राणेश्वरः। उ। नात्रोर्ध्वगमनं किं तर्हि बाधनमर्थः। आङो। कथं आजघ्ने विषमविलोचनस्य वक्ष इति भारविः। अकर्म
कादित्यनुवृत्तेः। उ। वक्षसि स्यादपि। अयमर्थः विषमविलोचनस्य वक्षसा स्ववक्ष आजघ्ने बाणनयः प्रतिमुखं यथा स्यात्तथा
भुजाभ्यामेव। अथवा विषमविलोचनस्य भुजाभ्यां स्ववक्ष आजघ्ने अथवा सामीप्ये षष्ठी स्ववक्ष आजघ्ने आस्फोटितवान्
यद्वा प्रतिमुखमिति विभक्त्यर्थे अव्ययीभावः। विषमविलोचनस्य वक्ष एव आजघ्ने प्रकृततलाद्यक्ष एवं बाणो यमहननिति तङ्। पू

दुर्घ० वृ०
६
८

र्व्याख्यायाअकर्मकाच्चेत्यनेनपदं इति भागवृत्तिः। समो। कथं तच्छ्रैकं समगच्छत इति चंडी। अकर्मकादित्यनुवृत्तेः।उ।एकाममिति चानुर्व
र्ण्यादित्वात्स्वार्थे ष्यञि तच्च एकं समगच्छत इति संपद्यते इत्यर्थः आगमहन्त्वात्तिङः प्रत्ययः। नेमं अश्मतिर्भगवत्यास्तम्भतीनाधि
रूपकत्वात्ते हि भगवतो वाग्विषयेष्वतंत्राः इत्युपन्यासः। कथं न संपद्ये गमनाय सेवरात्सखीजनं साक्षाद्दृश्यो तिचापरे तिघोषः।
तथा रक्षां सीतिपुरा विसंश्रृणुमहे इति मुरारिः अकर्मकादित्यनुवृत्तेः।उ।रकर्मकमतीहारे तत्र अन्योन्यप्रश्नसंदर्शनसंश्रवणपूर्व
कमुच्यते। सखीजनादिति पाठः। ल्यब्लोपे पंचमी सखीजनं प्राप्येत्यर्थः। सम्मानननः। कथं विनिस्सुरेलं गुरवो गुरुप्रियम् इति रघुः॥
उ।आचार्यकरणस्याविवक्षितत्वात्। तवाया चिरव्यासायामिति इत्यासनात्स्थापितं विवक्षा हि शब्दस्य सत्तेः प्रधानकारणं न च
स्तुतसत्ताकर्तृत्वे। कथं विगणय्यन यंतिपौरुषं विहितक्रोधजया। जेगीषव इति [illegible]रविः। इवेरित्यनुवर्तते तेन तङि त्विरक्षि
तः। एवं चापनयमानितिमानं आङ। उद्गमने प्रधाने गुणभूते च तङ् ज्योतिरुद्गमनस्य आक्रमेति धूमो हर्म्यतलमितिभाष्य
प्रत्युदाहरणात् अत्र द्युद्गमनपूर्विकायां व्याप्तौ। क्रमिरुद्गमनमात्रे आक्रमते। आदित्य उद्गमनपूर्विकायां व्याप्तौ दिवमाक्र
ममाणे वकेतु तारामयप्रदेति भाट्टिः। यद्येवं नभस्तिमात्राक्रामति नष्टवर्त्मना। स्निग्धैकचक्रेण रथेन भास्कर इति।उ।अपपक्षादस्वा
यमिति भागवृत्तिः श्रीसर्वज्ञरक्षितस्त्वाह। व्याप्तिमात्रवचनोऽत्र क्रमिः उद्गमस्तु गम्यमानोऽपि न विवक्षितो विवक्षा हि शब्दस्य
सत्ते प्रधानं कारणं न तु वस्तुन सत्ता तदा घ्यानिर्व्यासायामित्यत्र सत्त्वयोगेण स्थापितं। प्रो। कथं ते तां हंतुं प्रचक्रमुरिति चंडी।उ।
पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। अनुयावारिपूर्णा महीककालापत्र संक्रमते गुरुः। तथा अर्धरात्रे कलाहीने यदा
संक्रमते रविः।उ। समउपसर्गप्रतिरूपकत्वात् अनुपसर्गादिति तङ् यच्चक्रीडोतुसंपरिप्यष्वेतितत्क्रोकं समासाहचर्यात्॥ ६

अन्वादय उपसर्गाः स्युः ते इति तत्कर्मप्रवचनीयव्यावृत्तिपरं क्षमे। अकर्मप्रवचनीयत्वात् उपसर्गप्रतिरूपकत्वस्तु परिणामाहू चर्य्यान्ताम
ह्वा। अकर्मकाच्चेति चकारानुवृत्तेरेव सा हि उपसर्गान्तरे तङ्। संक्रमतइतिवापाठः। स प्रासिद्धो गुरुरिस्यर्थः अकर्मा। कथं संभविष्मा
वपकस्या मा भिजानासि मातरिइति भट्टिः अभिजानासि देवदत्तः कश्मीरेषु वत्स्याव इति जानातेरकर्मकत्वादनेन तङ् प्रसंगात्। ३।
मव। स्थितविभाषा विज्ञानात्। ज्ञानोपसर्जनवृत्तिसा जानातेर्ज्ञानार्थत्वात् तङ् भाव्यकारवचनाद्वा अभिजानामी भुक्तवान् भागव
त्तिः वाक्यार्थस्य कर्मविवक्षितत्वादिति रक्षितः। एवं च जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽपि दृष्टा मये स्त्र तङ् नस्यात् क्रोतिक
त्रभिप्राये तङ् उपाध्यमः कथं उपपस्त्रमहास्त्राणि। तथा। उपायं सततवासवं। शास्त्राण्युपायंशात जितत्वराणि नोपयचेत ध्वमेयं
सीलामिति भट्टिः। स्वकरणं पाणिहरणमिति व्याख्यानात् उक्करणमसंतिकस्वीकार इति रक्षितो भागवृत्तिः उपाङ् पूर्वो
त्रयामि स्वीकार इति जयमङ्। ततश्च समुदायो यमोऽग्रंथोतितादि स्पन्यः स्त्रियतेः। कथं मम्रेपतंगवत् वीरै रिति भट्टिः ३।
कर्तरि स्यनुवृत्तेः। कर्त्तरीति नियमात्। भावे तङिति रक्षितः। म्रो कथं प्रजासुवृत्तिं मम भुंक्ते तिभारविः उपसर्गयोगात्। ३।
कर्त्रभिप्राये भुजोनवने। कथं दिवं मरुत्वानिव भोक्ष्यते महीं। तथा बुभुजे पृथिवीपालः पृथिवीमेव केवलामिति रघुः। तं
था बुभुजाते चिरं महीमिति कामंदकीयः अनवन इति प्रतिषेधात्। ३। भुजो भक्ष इति कर्त्तर्ये अनवनग्रहणमुपभोगवृत्तावपि
त्वावदिति रक्षितः पुरुषोत्तमदेवश्च उपभोगोत्रार्थः आत्मसाक्षात्करणं वानवनं एवं च वृद्धो जनो दुःखशतानि भुंक्त इत्सपि
चांद्रास्तु भुजो भक्ष इत्सेवमाहुः। तेषां चिंत्सं अत्तु। कथमित्थं नृपः पूर्वमवालुलोचे तत्तो भुजस्ते गमनं सुतस्येति भट्टिः ३। न
पेणेति विपरिणामेन कर्मण्यात्मनेपदमिति जयमंगला। शेषात्। कथमिदं गुरुभ्यो नवभ्यः पूर्वेभ्यो नमो वाकं प्रशास्महे इति

तिभवभूतिः। शासेः परस्मैपदित्वात्। आङः शासु इच्छायामिति सस्य रूपं। आङो योगः प्रायेणेति लक्ष्यते। कथं सविध्यामां कमिभूला
पितृभिः सह पठ्यते।३। कर्मकर्त्तरि तङ्। कथं दासमलं गच्छेते नारी दृढस्तु पुरुषोत्तमः। तथा नालालंकारिणी समत्वे इति रघुः। कर्मव्येति
हारेण गति हिंसार्थेभ्य इति निषेधात्।३। नालात्ते रिति तु पाठः। कर्त्तव्यः। कर्मकर्त्तरि वा यं तङिः ती ति दं। कागच्छत इति चिंस। मिदं। क
थं मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छतीति इति कर्मणि तङि पापैरिति स्यात्।३। कर्मवद्भावे कर्त्तरि यगालनेपदं अंतर्भावितण्यर्थो
वा मतिः पापेभ्यो मुच्यते सान्यतद्रसर्थः। कथं रजसा शुध्यते नारी ति तङ्।३। शुद्धशब्दात् क्तात्तात्तत् करोतीति णिच् कर्मणि तङ्।
कथं कदाचित् कुप्यते माता नोद्दारस्था हरीतकी ति।३। कर्तृकिंवतात् क्यङ्। कथं प्रियामुखं किंपुरुषश्चुचुंबे इति कुमारः।३। कर्म
व्यतिहारे अन्योन्यं चुंबनमिति कर्मव्यतीहार इत्सनुन्यासः। कथं मन्वेषमाणं मुकुरीतिकाइंदरी तथा प्रेषेत क्षणमास्थानमिति
कर्मनावाकांनातथा अध्येषम ह इति वध्यादिसूत्रे वृत्तिः।३। एतद्बेमुपणगता विसस्य रूपं। कथं नंदनेन्चकुलपुंसां। तथा
ततः स ददृशे चतौ मधुकैटभौ। तथा तपृण्षमयास्मातं यथावत्कथयामिते।३। आगमलादिसुक्तमेव। कर्मकर्त्तरि वा रूपा
णि। कथं स्वराज्यं प्राप्स्यसे भवानिति।३। आगमलादिति। कथं वलनो निलः क्षमानो नच्छः। ताच्छील्ये वाच्यानश। कथं प्रसज्ज
ते भूसज्जगतावितिअस्य परस्मैपदित्वात्। उच्यते। प्रसज्जत इति। भाव्यकार्यवचनादिति धातुप्रदीपः। बुध। कथं पातालहंसाः
पुटभिन्नैर्नादैः प्रबोधयंतं नृपनागकन्यका इति। अनेन परस्मैपदित्वात्।३। णेरणा विसादिना तङ्। अयमर्थः। नागकन्या ह
सान् प्रबोधयंते। हंसास्ताः प्रबोधयंते एवं कारेणुनारो ह्यते निषादिनमिति माघः। ससंततं दर्शयते गतस्मयमिति भारविः। निगणक
थं शिरः कम्पयते युवा। अनेन परस्मैपदित्वात्।३। चिसमिति। भा[illegible]वृत्तिः। शिरः कम्पायत इति वा पाठः कर्त्तव्यः। शिरः कम्पयते गच्छ ७

तीत्यर्थः। अयमलाविधस्य रूपं॥ ॥शारणदेवस्य दुर्घटवृत्तौ भूमादयः॥ ॥आकडारात्॥ यू स्त्र्याख्यौ नदी· कथमति लक्ष्म्यै ब्राह्मणाय।उ। अवयवाश्र
यनदीत्वात् सिद्धिरिति रक्षितः। कथं तर्हि नित्यं सुमतये प्रियविप्राय।उ। ह्रस्वयोरियङुवङ्स्थानयोश्च· य्वोरिति· ह्रस्वस्य चेति स्त्री
वचन एव पाक्षिकी नदीसंज्ञेष्यते नावयवाश्रयेति स्मृतिरिति· भाषावृत्तिः। एवं मंजुश्रियं शारीतिरत्नश्रीप्रयोगः। काव्यदृष्टोयमपश
ब्दो आवयवाश्रयनदीत्वाभावात्· नेयङुवङ्। कथं हा पितः क्वासि हे सुभ्रु इति भट्टिः। विमानना सुभ्रु कुतः पितुर्गृहे इति कुमारः। अ
नेनदीत्वप्रतिषेधात्। ह्रस्वाभावात्।उ। अप्राणिजातेश्चारज्ज्वादीनामिति ऊङि· समासे· उपसर्जनह्रस्वत्वे कृते ऊङु तरस्सू ङ· तस्य
समुदायभक्तत्वात् नो वङ्स्थानत्वमिति संबुद्धौ ह्रस्व इति भट्टिटीका। वामीत्यतो वाग्रहणमनुवर्त्य व्यवस्थितविभाषात्वादिति श्री
कण्ठः। वर्षाभ्वश्चेत्यत्र तु स्थानग्रहणादपवादविषयमुत्सर्गेण निषेधविकल्पमोऽप्रतिक्षेपात् नित्यं नदी निबंधन आट्। कथं सखिना
वानरेन्द्रेण।उ। अलवणायवागूरितिवत्· अल्पार्थे नयोर्विधानादित्सु न्यासः· कथमतिसखेरागच्छतीति असखिरिति प्रतिषे
धात्।उ। असखिरिति प्रथमानिर्देशाद्विवर्णे वर्णान्तस्य घित्वं प्रतिषेधश्च सखिशब्दस्यैव न वर्णमात्रस्य तदन्तविधिना प्राप्नोती
ति चेत्। न। तत्र हि ग्रहणवता प्रातिपदिकेन तदन्तविधेर्नास्तीति केवलस्यैव निषेधो न तदन्तस्य। यद्येवं कथं बहुसख्याकृतं बहु
सखेरिति।उ। असखिरिति प्रत्ययेन षष्ठ्यर्थे प्रथमेति वर्णमात्रस्य घित्वप्रतिषेधोपि तस्यैव तथा च द्वंद्वे घ्योरित्यत्र घ्यन्तं पूर्वं नियमेती त
ष्युच्यते इति वृत्तिः। एवं च सखिशब्दावयवस्येकारस्य घित्वप्रतिषेधात् बहुसंख्या बहुसखेरिति भाष्यानुगतो रक्षितः। पतिः
कथं पतिना नीयमानायाः पुरः शुक्रो न दुष्यति। तथागते मृते प्रव्रजिते क्लीबे च पतिते पतौ। तथा पत्यौ जीवति या नारी उपोष्य व्रत
चारिणी। आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत्।उ। शेषो घ्यसखिपतीति वक्तव्ये पृथक्करणं लक्ष्यानित्यत्वज्ञापनार्थं· जीवप

दुर्घ० वृ०
८
8

सामिति तु शेषग्रहणानुवृत्ते ङिति ह्रस्वश्चेति न दिलादितिरक्षितः। कथं दुहितुः पतौ।उ। समासे कृते विभाषा स्वसृपत्योरिति लुग्विधाना
त्। संयोगे। कथमकृतधनेश्वरस्य बुभूषः समेतमापो धनं तमर्थ्य मितो विलोकाविबुधैः कृतोत्र समेतमापो धनं विभव मदेन निकृतं क्रि
यातिमा सम्पन्नकं व्यथयति स्म सथाद्धिगताथ वेह सम्पन्नकमिति दृश्यमसर्गेन भट्टिः। तृतीयपादे हि शब्दे परतो न वर्मवत्
स्यात् शब्दस्य गुरुत्वात् छंदोभंगात्।उ। निकृतयेति पाठः। कृतर्थ्यः। कथं भेत्ता प्रकृतिप्रसमावयवसंयोगे गुरुत्वात् गुणाभावात्।उ।
ऋक्षिग्रधिध्वषिक्षिपेः क्नुरिति क्नोः किलं धृष्णुजिष्णु हिंसादेर्गुणाभावार्थं कृतं ज्ञापयति नैवं विधेर्गुरुत्वात् गुणाभावः। अतोग्नु
णप्रसंगे किलं गुणाभावार्थं न च ककारस्तत्र श्रवणार्थो निःसशब्दादर्शनात् व्यात्येश्च। तदुक्तं कुसनोर्यत् कृतं किलं ज्ञापकं स्या
त् लघोर्गुणे अष्टं रं बहुत्वान्नोक्तं। कथं प्राप्तनाभिह्रदमज्जनमाप्रपुप्रस्थित लीः स न ग्रहणामे तिमाघः। ह्रू शब्दे परतो गुरुत्वात्
छंदोभंगात्।उ। प्राप्तनाभिनद इति पाठः साधुः छंदः शास्त्रे प्रेह्रेवेति सूत्रेण विकल्पेन गुरुत्वमिति कश्चित्। यस्मात्। कथं नु
त्तवने अतस्तु घादिला छप्रसये कृते नुदादितीति तदादिग्रहणात् विकरणांतस्य अंगत्वे सार्वधातुकाश्रयगुणप्रसंगात्।उ। अं
तरंगत्वात् उवङ् विकरणाश्रयः। स्वादिषु। कथं राजेति असर्वनामस्थान इति निषेधात्।उ। नङिसंबुध्योरिति ज्ञापका
त्। सुप्तिङं तं पदमिति प्रतीप्रसूयते न स्वादिष्विति रक्षितः अथवा अध्यारोपितबहुत्वाद्बहुवचनं यथादृश्यः स्वसनो घु
ष्यो लुङी सादौ पकशो षेण षेसन्मः। कथं वा सुदेवं परिस्रज्य यो न्यदेवमुपासते। तत्पितो जाह्नवीतीरे कूपं खनति दुर्मतिरिति। ए
कत्वे उपास्त इति युक्तं। असंगति दीप्तादाने छिःस्य भौवादिकस्य उभयपदिनो रूपं गच्छति। गृहीते वार्थे। गणकार्यमनित्यमिति
वा शपो लुगभावे रूपं। कथं येन यथा भवितव्यं न तत् भवति यान्यथा इति।उ। तेदृधातोः किंपि संबोधने ते इति तदादित्ति वा पाठः कर्त्त ८

व्यः। कथं मंघश्च पुष्प दंते वनं प्रविष्टौ इत्यत्र धातु।।ऽ। तेष्ट देव देवने लुप्त द्रुतेवनं क्रीडां दर्थं वनं तेवनं प्रविष्टा वित्यर्थः। अथवा अस्माद्देव
धातोः सम्पदादित्वात् क्विपि वलिलोपः। ते क्रीडादर्थं वनं तेवनं क्रीडावनमित्यर्थः। अंधनिर्वाहणमिति। षष्ठी समासः। तत्करोतीति पंचगुर्णतो
दर्शयति। यद्वा नयतीनीः सत्सूद्विषेत्यादिना क्विप्। नपुंसकह्रस्वत्वं अधीवक्षुषीयस्य सो अंधनिर्गलीनचक्षुः वाहनं करोतीत्यर्थः। कथं
विप्रुक्कुशुर्भूमिपतेमहिष्य इति भट्टिः। यतो महिषी कृताभिषेका सा चैकैव।।ऽ। जात्यादव्याप्यामेकस्मिन्निति बहुवचनं उपचाराद्वा अवरोधा
द्रूणां भण्यते कथं वहति स्त्री धान्यमुलूखलेन।।ऽ। अवपूर्वस्य हन्तेर्दृष्टिमागुरिरल्लोपमवाप्योरुपसर्गयोरिस्याकारलोपे रूपं कथं विदूरदूते
षु कल्याणं यदि वक्षोनतिष्ठति दूत इति युक्तं। वद्भ इत्येकवचनात्। ऽ। दूत इव दूतेषु उपमितमित्यादिना समासः दूतोष्योः कल्याणमि
ति षष्ठी समासः। सुकल्याणमिति दम्भादिर्वापठितः। ध्रुवं। कथं शब्दे सोऽपि युज्यति क्षणमहो वित्राप्रयोगास्थितिरिति भागवृत्तिः। त
थाप्रमाघत्तगुणानां हितइति भट्टिः। जुगुप्सा विरामप्रमादार्थानामुपसंख्यानमित्यपादानात्।।ऽ। एवेचानियोग इति वत्सापिकमिदं। ए
कमुनिपक्षे तु बोद्धा पादान त्वेप्रसात्व्यातं ततश्च कश्चिद्देवं। वाद्। कथं मद्दोषक्ष इति जगत्सर्वं वशीकर्तुं अयतत ततः। परापवादमस्येषु चरती
गोर्निवार्यतां।।ऽ। ध्रौव्येण। विवक्षितत्वात्।।ऽ। अंधस्य गम्यत्वेनेति स्थितः कूपः माणवकस्य ज्योतीरूपोर्थः स्पृहणीयत्वेन इप्सित इति
रक्षितः। जनिकर्तुः कथं जातं वेशो भुवनविदितेषुष्कारावर्त्तकानां इति मेघः।।ऽ। वंशः प्रकृतिर्नतु वंश एव। स्पृहेः। कथं स्पृहणीया विभू
तिः स्पृहणीयविभूत्यै इतिस्मात्। पुष्पाणि स्पृहयति कर्मत्वं अनेन संप्रदानप्रसंगात्।।ऽ। इप्सिततम विवक्षायां कर्मसंज्ञैव परत्वादि
त्यन्यासः। क्रुध। कथमस्मान्द्वेष्टि।।ऽ। अप्रतीतो हि द्विषं स्मरंतीति न्यासः। कथं ताहि द्वेष्टि प्रायो गुणिभ्योपि नैव स्त्रियस्तिकस्यचि
दिति भट्टिः।।ऽ। असूयार्थस्य विवक्षितत्वात्। कथं तां प्रति क्रुद्धो नृपः।।ऽ। यं प्रतिकोप इति निर्देशात्। त्सूर्वं विप्रतिषेधेन चतुर्थी वाधित्वा

दुर्घ० वृ०
६
५

कर्मप्रवचनीयविभक्त्या द्वितीया। एवं वृक्षं वृक्षं प्रति कुसुमानि सिंचतीति अर्थं अर्थं प्रति शब्दनिवेश इत्याधारसप्तमीं बाधित्वा द्वितीयेतु
साधुनिपुणाभ्यामिति रक्षितः उपात्वा। कथमुपोष्य रजनीमेकां पंचगव्येन शुध्यति। तथा एकादशीमुपवसंति निरंबुभक्ताः संवत्स
रं च कुसुमैरीशमर्चयंति। वशेरश्यर्थस्य प्रतिषेधो वक्तव्य इति वचनात् कार्यत्वाभावात्। कालाध्वनोरत्यंतसंयोग इति द्वितीया। म
घेवं कथं एकादशीं न भुंजीत।३। उपपदविभक्तेरित्यादेः अंगफलत्वात्। सामान्यचिंतायां पूर्वविप्रतिषेधेनोपपदविभक्तेः कारकविभ
क्तिर्बलीयसीति। कथमोदनं पचति वस्त्रं वयति अनयोः पाकवयनायोगात्।३। तादर्थ्यात्ताच्छब्द्येन ओदनवस्त्रशब्दौ तंडुले तंतौ
वर्त्तेते इति रक्षितः। कथं कृगता प्रिया कर्मत्वसंगात्। कथं गमयति ग्रामं विप्रमिति अभिकर्तुः कर्मत्वेन क्रियाप्राप्यस्य ग्रामस्य क
र्मत्वं न स्यात् कर्मसंज्ञाविधौ कर्तृग्रहणात्।३। न कर्तृग्रहणं स्वतंत्रोपलक्षणं कर्मत्वेपि स्वव्यापारे स्वातंत्र्यस्यानुपहतत्वादिति रक्षि
तः। कथमयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक इति कुमारसंभवः। ग्रहेरगत्यर्थत्वात्।३। देवदेवमयाचितारमद्रिः सु
तां ग्राहयितुं अलमसमर्थो न शशाक समर्थः। देवदेवेनेति प्रकृतत्वात् विपरिणामात्। अनयोरेकत्वस्मरणं दोषमिति। अकथितं चेत्य
त्र चकारस्यानुक्तसमुच्चयार्थत्वात् अत्र कर्मत्वमिति सत्ये अपशब्दोयमित्यनुन्यासः। चकाराद्देवदेवासुरैरमृतमंबुनिधिर्ममंथेतिय
त्रस्तेन देवस्तः पातं पितरस्यपि साधुः पूतनाबाड्डिषे मूर्धु मुक्त्वा न्यानप वाजिनः आयुंषि लक्षिणि भेघ प्राभंज निरमोवयदि
ति भट्टिः। अत्र मुचेर्गुणभूतगत्यर्थत्वात् कर्मत्वं गुणभूताच्च गतिः कर्मसंज्ञा। निमित्तं नीवह्योः प्रतिषेधो वक्तव्य इति ज्ञापकात्त्याप
णं हि गुणभूतगत्यर्थमिति रक्षितः। एवं च मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या इति मेघः। त्यागस्य गत्युपसर्जनीभूतत्वात्
मघेवं कथं सितं सिति सिति मासुतरां मुने वेपुर्विसारिभिः क्षौधामिवाप्यलभ्यमन्धिजा वलिवाजिनिशाकरांशुभिः सुविस्मितां वा ६

चप्रबोचदच्युत इति माघः।३। लंभयन् योजयन्नित्यर्थः अथ कथं विधिप्रयुक्त सत्कारैस्त्वयं मास्म-भूकः। सतैराक्रामयामास शुद्धांतं
शुद्धकर्मभिरिति कुमारः। आक्रमणस्यगुणभूतगत्यर्थत्वात्।३। विधिप्रयुक्तस्य सत्कारान् शुद्धं कर्मण इति द्वितीयांतः पाठः कर्तव्यः।
अथवा ज्ञापकसिद्धं न सर्वत्रेति गुणभूतगत्यर्थेनापि क्वचिदेव कर्मत्वं। उर्यादि कथं वा तणीमद विशंकमथा। वेश्म क्षुणो भवदसावि
नयाग इति माघः। आविः शब्दस्योर्यादित्वात्। गतित्वे तेप्राग्धातोरिति भवतेः प्राग्योगात्।३। अंतश्चक्षुषो भवदिति वा पाठः कर्त
व्यः। अथवा गणकार्यमनित्यमिति सामान्येनाश्रयणीयं। ध्याचिंतायामिति दिवादौ पठिते ध्यै चिंतायामिति ज्ञापकात्। पुरो। कथं पु
रो रामस्य प्रादुर्भावं चकार ज्वलनेन पुरीरिति भट्टिः अनेन गतित्वे धातोः प्राकृतत्वसंगात्।३। क्रियायोग इत्यनुवृत्तेः क्रियायोगे गतित्वं
न चात्र क्रियायोगः। क्रियायोगे एवेत्यवधारणं इति पुरुषोत्तमः एवंच तस्यास्थित्वात् कथमपि पुरः केतकाधानहेतोरिति माघः।
पुरो लकायाः केतकाधानहेतोरिति चात्र केचिद्योजयंति अथवा तेप्राग्धातोरिति संज्ञानियमः येषां गत्यादिसंज्ञा विधेया धातोः
प्राक्प्रयुज्यमानाः संतः संज्ञां लभंत इति। एवंच प्रयोगस्यानियतत्वात्। यथादर्शनं व्यवहित प्रयोगः। विनाधा। कथं भूस्तिरस्कृत
वात इति तिरोंतर्द्धाविसनुवृत्तेरत्रांतर्द्धानाभावात्।३। अव्यवस्थित विज्ञानात्। पुष्पादिः। कथं परमत्वं पठसि ग्रहणवताप्राति
पदिकेन तदंतविधिर्नास्तीति तदंतत्वाभावात्।३। अपूर्वाश्चेति। प्रत्ययविधौ ज्ञापकात्प्रत्ययविधेरयं क्वचित्सामान्येनेयं स्त्री क्रि
यते तथा शेषो घ्यसखिरित्यत्र न्यासः सुसख्येरागच्छतीति अतिसख्येरागच्छतीति असखिरिति नघ्वतिषेधो ग्रहणवता प्रातिपदिके
न तदंतविधिर्नास्तीति निषेधादिति। ननु तदंतत्वं स्त्री क्रियते कथमतित्वं पचतीति स्वरूपमित्यत्र रूपग्रहणात् रूपवद्धर्थो प्यं
गी…क्रियत इति ज्ञापितं। तेनार्थांतरवृत्तित्वात्। यथा मामहान् महान् संपन्नः महद्भूतश्चंद्रमा इत्यादिना नात्वं भवतीति न्यासः। भ

दुर्घ०वृ०
१०
10
सं

वान्यातीसन्नुसंसपित्रुष्मदर्थेरूपाभावान्नभवति।अर्थवतोरूपस्यग्रहणात्।नचात्ररूपस्यगम्यमानत्वंभवच्छब्देनार्थस्योक्त
त्वात्भयंयदातुअस्मएव।ति भवान्समन्तइतिचेत्भेदविवक्षायांकिंचिन्न्यूनोयुष्मदर्थेउच्यतेसादृश्यात्तदामध्यमपुरुषः त्वत्तोस्मो
माप्तीतियदात्वम्यवोच्यतेतदाप्रथमपुरुषः लोकलोदेवदत्तोपाप्नोतीतिरक्षितः।अस्मदिकथमहमिवकरोतिउत्तमपुरुषएवकरो
तेर्युक्तः।उ।गौणत्वादस्मदर्थस्यनोत्तमपुरुषइतिरक्षितः। संवरक्षितस्कृतशरणदेवदुर्घटवृत्तौप्रथमोध्यायः॥१॥ ॥समर्थोक
थमसूर्यंपश्याराजदाराः अश्राद्धभोजीत्यादौनञ्समासः।क्रियमानत्वेः संबंधादसामर्थ्यात्।उ।गमकत्वात्गमकागमकाभ्यां
समासोवेदितव्यइतिभाष्यं।अकर्तरिचकारकइतिकारकग्रहणात्प्रसज्यप्रतिषेधेपिनञ्समासः पर्य्युदासेहिनञिवयुक्त
न्यायेनाकर्तरीसेवकारकसिद्धोकारकग्रहणंव्यर्थंस्यादित्यन्यःसुट् स्त्रीपुंसमोरितिचवक्रमेसेडनपुंसकस्येतिज्ञापकमिति
भागवृत्तिः।अंगयुक्तंतिङाकांक्षमितियुक्तग्रहणात्ज्ञापकात् समर्थपरिभाषायाअनित्यत्वेअसामर्थ्येविपदविधिरितिरक्षि
तः एवंचवपंगङ्खामत्वामागमिष्यतिइत्यसामर्थ्येपिविसर्जनीयादिपदकार्य्यं।सह।कथंसाप्रतिकाभावेभूतपूर्वंगतिरिति।अत्र
भूतपूर्वशब्दः समासलक्षणाभावात्।उ।सुपसुपेतियोगविभागात्भूतपूर्वेचरडितिसूत्रवृत्तिः।एवंदृष्टपूर्वाश्रितपूर्वपूर्वविप्रतिषे
धाधागतत्याद्यः।अप्ययं।कथंप्रत्यक्षःशब्दः।अक्षमक्षंप्रतीतिवीप्सायांयथार्थेअव्ययीभावात्।उ।प्रतिगतोअक्षमितिवि
ग्रहप्रादयोगताद्यर्थेद्वितीययेतिसमासः।द्विगुप्राप्तापन्नालंमित्यादिनापरावल्लिंगतानिषेधः।अर्थमर्थंप्रत्यर्थमितिकथंवा
व्वंवीप्सायांतिसमासात्।उ।लक्षणेत्थंभूतेत्यादिवीप्सायांकर्मप्रवचनीयसंज्ञाविधानसामर्थ्यादितिकर्मप्रवचनीयविभक्तिर
पिद्वितीयाश्रुयतइतिवाक्यमितिन्यासः।कथमेकैकंप्रतीतिप्रत्येकमिति।उ।एकंद्वन्द्वीहिवदित्यतिदेशात्सुपोतिपेलुलोपे

कथमुपदिक्षितिरक्षोघ्नं धारयतीति विभक्त्यर्थे अव्ययमिति समासात्।उ। समीपादिवृत्तिभिरतद्धितांतैः साहचर्यात्तद्धितांतस्य विभक्त्यर्थे समासा
त्। कथंमणग्रहमिति। अभितःपरितः समयानिकषेतिवार्त्तिकोदाहरणं।उ। द्वितीयाविधानसामर्थ्यान्नाव्ययीभाव इति रक्षितः। ननु शोभ
नंसमायायाग्रामं इति सविशेषणस्य समासाभावे द्वितीयाविधानं कृतार्थं।उ। मक्तो सामर्थ्यं वाच्यं कथं पुरोवामस्य जुहु वाचकार ज्वलनेन
वपुरितिभट्टिः। विभक्त्यर्थे पदव्ययमिति समासात्।उ। दक्षिशब्दस्यास्त्वान्त्वरस्य पूर्वनिपातेनास्यानित्यत्वज्ञापनात्। समीपादिवृत्तिनाव
येनातद्धितांतेन समाहचर्यात्। तद्धितांतमेवाव्ययं विभक्त्यर्थे वर्त्तमानं गृह्यते अगमकत्वादेव उभयं रक्षितेनोक्तं। एवं ग्रहस्योपरि
सादि। यथा। कथं। यथोक्तपारीत्येति कतरकतमौ जातिपरिप्रश्न इत्यत्र न्यासः। कथं यथाशक्त्या करिष्यामीति कायस्थोक्तिः।उ। साद
श्ये असमास एवायं तदनुरूपेणेत्यर्थः। अप। कथमपशब्दः। अपन्यो पो अपव्यवहारः। अपगतः शब्दादित्यस्मिन्नर्थे नेन समासा
त्।उ। कर्मप्रवचनीयानां प्रतिषेध इति प्रतिषेधवचनात्कर्मप्रवचनीये अस्य कृतार्थत्वादन्यत्र परत्वादंतरंगत्वाच्च प्रादिसमासः।
कथं बहिर्ग्रामादिति पंचमीविधानात्।उ। अत एव पंचम्याः समासविज्ञानात्। बहिः शब्दयोगे पंचमीति वृत्तिः। करस्य करभो बहिरि
त्यमरः।उ। ज्ञापकसिद्धं न सर्वत्रेति ज्ञापकसमुच्चयः। तिष्ठद्गु। कथं आतिष्ठद्गु जपन्संध्यामिति भट्टिः। चकारेणेवृत्तौ समासांतरनि
वर्त्तनात्।उच्यते। वाक्ये दमव्ययीभाव लक्षणं समासांतरं निवर्त्तितेनाव्ययीभावः। तेनोऽ मर्यादाभिविध्योरिति समासो भवत्येवेति तु
जयमंगला। अन्यकथमगात्सराजंवनमध्वनीनमिति भट्टिः। नदीभिश्चेत्यनुवृत्तेः। कुञ्जीहौत्वनश्चेति समासांतो न स्यात्। अव्ययी
भावानुवृत्तेः।उ। यौगपद्ये अव्ययीभावः। यथा साष्टेशाते सुवर्णनामिस्य अमरः। द्वितीया कथं पारार्थभावनिर्वृत्तिं प्रभवेयं दिने दिने इतिध
र्मकीर्त्तिः नलोकेति षष्ठीनिषेधादत्रानुकूलत्वात्।उ। द्वितीयेति योगविभागात्। सुपृसुपेति वर्णपरार्थ्यभावमुद्रोऽपुरितिवापाठः कर्त्तव्यः

।तृती। कथं पिकध्वनिमुखरः शशिकरपल्लवितः तथा रत्नद्योतितं तु वदति ब्रह्मसुखकुंजेभ्योरः। तारकादिभ्य इतच्: दंत उन्नत उरजिति
मुसलनाम्नमुखरादेश्च गुणवचनत्वात्।३। तृतीयेति योगविभागस्य कैयटेनोक्तत्वात्। कर्तृकरणे कृता बहुलमिति बहुलवचनात्॥
पूर्व। कथं गुरुतुल्यः। सदृशशब्दस्य स्वरूपग्रहणात्।३। तुल्यार्थैः षष्ठ्यन्यतरस्यामिति षष्ठ्या षष्ठीसमास इति। चतु। कथं वासगृहम
श्वघासः स्यादित्यर्थे न प्रकृतिविकारभावे समासोयमिष्यत इति वचनात्। तेनारं धना यस्याली स्तत्र न समासः। षष्ठीसमासो माभि
ति कैय्यटः। पंचमी। कथं नीवीमतिक्रम्य स्थिते तरस्य तन्मेखलामध्यमणेरिवार्चिरिति तु कुमारः इतरशब्दस्याभयशब्दत्वात्॥
३। पूर्वोक्तबहुलग्रहणात् तथा च न्यासः। बहुलग्रहणं प्रपंचोदाहरणान्येतानि इति सितइतरो अस्मादिति बहुव्रीहिर्वा कर्त्तव्यः। क
थं परशताद्या इत्यमरः। तथा आलोकमामासहारिमेहीधरानधिश्रयंती जगतां परः शताः इति माघः।३। शतात्पर इति विगृ
ह्य पंचमीति योगविभागात्समासः राजदंतादित्वात्परनिपातः। मयूरव्यंसकादित्वाद्वा समासः। पारस्करादित्वात्सुट्। लोकाश्रय
त्वात्तु लिंगस्य न परवल्लिंगता। स्त्रियाः पुंवदिति योगविभागात्पुंवत्त्वं। एतत्सर्वं नाजकत्वादि सत्र परः शतानीति व्याचक्षाणेन भा
ष्यटीकाकृतोक्तं पारस्करादिपाठादेतत्सर्वकार्यं सिद्धमित्यन्ये। एवं परिमाणं शतादूर्ध्वं परः शतमुदाहृतं तथा ब्रह्मादयो ब्रह्महिता
यतश्चापरः सहस्राः शारदस्तपांसीति भवभूतिः। कृत्यैः। कथं संवत्सरकरणीयमिति यत्नस्य पेनैवेष्यत इति वचनात्।३। सप्तमी
समासोयं बहुलवचनाद्वा। पूर्वकाले कथं पणैकं देहि सर्वकाले कृ इति समासे एकशब्दस्य पूर्वनिपात्।३। घेकयोर्द्विवचनैकवच
न इति वचनात्। द्वेकशब्दौ संख्यावचनौ आदशतः संख्याः संख्येये इति तु पापिकं तेन पणस्यैकमिति षष्ठीसमासे धर्मधर्मिणो
रभेदोपचारात् द्रव्यविधायित्वं अपशब्द एवायमित्यन्ये। पुराणैकं देहीति साध्वेव अनेन समासे शब्दपरविप्रतिषेधात्। पुराण

शब्दस्य पूर्वनिपातादिति रक्षितः। कथं शरवर्षी मनेकवीरमिति माघः। पूर्वकालैकेति परत्वात् पूर्वापरप्रथमेत्यादिना समासे पूर्वनिपातप्र
संगात्।ऊ। पूर्वप्रतिषेधो द्रष्टव्यः। तद्धितः। कथं पंचगुः पुरुषः।ऊ। तथा तद्धितार्थे यमत्वर्थे नेष्यते। अनभिधानात्। पंचगुरिति रक्षि
तः। संख्या कथमेकापूपीति।ऊ। कुत्सित स्यद्रानेष्कान्मिलेवापूपे समाहारारोपात्। सत्यत्रस्य महाफललाभ्र समाहारारोप इति रक्षि
तः। विशेषणं। कथं मेरुपर्वतः कैलासाद्रिः शिंशपावृक्षः शमीतरुः तर्कविद्या व्याकरणशास्त्रं व्याप्यकर्मादि तथा कार्त्तवीर्यार्जुनो नामरा
जा बाहुसहस्रभृत्। तस्य संकीर्तनादेव सद्यो नष्टं च लभ्यते इति विशेषणमित्येतावत्युक्ते संबंधिशब्दात् विशेषेणेति लब्धविशेष्यग्रह
णेन उभयतो विशेषणविशेष्यभावे समासविधानात्। इह मेरुप्रभृतिशब्दादेव पर्वतादेः प्रतीतेरिति न पर्वतादीनां विशेषणत्वं।ऊ।
बहुवचनाद्भविष्यति। कार्त्तवीर्यार्जुन एवायमपशब्दः वृत्तौ बहुलवचनाद्यावृत्तेः लोके तु कार्त्तवीर्यार्जुन इत्यसमास एव वा। इदं स्त्री
इयं पुमान् इति विशेषणं समास एव इत्यपरोक्षव्यावृत्तिः स्त्रीपुंसाभ्यां शाटीवघटादव्यावृत्तिरिति उभयगत विशेषणविशेष्यत्वं अत ए
व भाष्यवृत्त्योरुदाहृतं। कथं परोक्षे कार्यहंतारं प्रत्यक्षे प्रियवादिनं। वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखमिति पयोमुख विषकुं
भमिति प्रयुक्तं।ऊ। विषकुंभ इव विषकुंभः पयो मुखमिव पयोमुखं ततः कर्मधारये मित्रमुच्यते। अथवा विषकुंभमिव पयोमुखमिवे
ति भिन्नपदे लुप्तोपमेयोयं। कथं जनयति कुमुदभ्रांतिं धूर्तो बकोबालमत्स्यानामिति। अनेन समासे बकधूर्त इति स्यात्।ऊ। अक्षिप
त्र बकशब्द इति कश्चित्। कुत्सितानां कौत्सिर्नौदिति चनास्ति। शब्दप्रवृत्तिनिमित्तकुत्सायां समासो न च जातेः स्वयमेव कुत्सितानीयां कुत्सा सं
भवतीति न्यासः। वृत्तौ तु। कथं तस्य सत्कुत्साशालिन इति भट्टिः। सन्महदित्यादेः परत्वादनेन समासे कुत्ससदिति स्यात्।ऊ। पूर्व वि
प्रतिषेधो द्रष्टव्यः। सतां कुत्सं सत्कुत्स मिति षष्ठी समासो वा इति एवं परमपूज्यः॥ ॥इति दुर्घटवृत्तौ समर्थपादः॥ ॥ पूर्वार्द्धं। कथं प्रे

ण्णाशरीरार्धहरां हरस्येति कुमारः ।उ। षष्ठीसमासोयं । तथाच भाष्ये । एकदेशिसमासंप्रत्याख्याय विशेषणसमासेन समुदायवृत्तीना
मवयववृत्तौ सिद्धे यत्र षष्ठीसमासो दृश्यते तत्र भवत्येव यथा अपूपार्धं मया भक्षितमिति ग्रामार्धं लब्धमित्युक्तं । वृत्तौ षष्ठीसमा
सापवादोयमित्युक्तं तन्मते द्वितीयतृतीये त्यतोन्यतरस्यांग्रहणमनुवर्त्तते र्व्यवस्थितविभाषा विज्ञानात् षष्ठीसमासः ग्रामपत्ने ग्रामाजी
विका ग्रामजीविका असमानाधिकरणे पुंवद्भावात् ।उ। स्त्रियाः पुंवदिति योगविभागात् पुंवद्भाव इति न्यासः । ग्रामापत्ने चेत्सविभक्ति
काकारविश्लेषाद्काराश्च पूर्वपदस्य विधीयत इति भागवृत्तिः । ईदूदेद्द्विवचनमिति प्रगृह्यत्वं नास्ति सौत्रत्वान्निर्देशस्य । नञ् । क
थंभवत्वनेकेजलधेदिवि वोर्मय इति भारविः ।उ। तथा अनेके अनेकेषां नानास्या नेन्यासः उत्तरपदार्थप्रधानत्वान्नञ्समासस्य
एकत्वबुध्याश्रयणात्तियमेकशब्दो अनेकमित्यादि एकवचनमेव प्रयुज्यते ज्ञापकं वानेकमन्यपदार्थमिति । तथाच माघः । क
रेणुः प्रस्थितानेकोरेणुर्घंटासहस्रशः इति अत एवाभागवृत्तिकृता अनेकेषामिति जितं द्रोक्ताः कालदृष्टा एव शब्दाः । राक्षि
तत्वाह । अध्यारोपितबहुत्वाद्बहुवचनं यथा घुञ्जो लुडीति ईदृश्चः स्यसनोरिति जहद्धर्मत्वाच्छब्दाः प्रवृत्तेरिति वा । एकशेषेण
बहुवचनमित्यसाधारणः सिद्धांतः नञर्थप्रसंगादुच्यते । चत्वारो नञर्थाः सादृश्यान्यविरोधेन अप्राप्तास्य निवर्त्तने भाष्ये तु
नञर्थप्रसंगादुच्यते । चत्वारो नञर्थाः सादृश्यान्यविरोधेन अप्रा षट्प्रकीर्तिताः । तत्सादृश्यमभावश्च तदन्यत्वं तदन्यता अ
प्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिताः । षष्ठी । कथमेषवंध्यासुतो जातः खपुष्पकृतशेखरः । मृगतृष्णांभसि स्नातः शशशृं
गधनुर्धरः । वंध्यादेः सुतादिसंबंधाभावात् । षष्ठ्याभावः ।उ। बुध्यावाधितोत्रसंबंधः । यथा शिलापुत्रकस्य शरीरमित्यत्र भेदः । विव
क्षाधीना हि शब्दप्रवृत्तिरिति तदापाविद्यमानामपि तिस्तत्तापितरनिर्धर्मिधारणव्यवहारः नन्वेह समुदायमेकदेशा तातथाना

न्तुन्यासः नभगवान्पुरुषोत्तमः। उत्तमशब्देनैकदेशरूपतया ख्यायते किंतु पारंपर्येणेत्यविषयोयंप्रतिषेधस्यसप्तमीतियोगवि
भागात्समासइतिपुरुषोत्तमः। प्रतिपदविधाना षष्ठी न समस्यत इत्युक्तं। कथं तर्हि गोस्वामी त्यादिषष्ठ्याप्रतिपदविधानात्।ऽ।
नेयंप्रतिपदविधाना किंतु सप्तम्या बाधकप्रतिपत्तौ प्रतिरूपमाना तेन गोलभित्यादि क्षिप्यतीति रक्षितः पूरण। कथं तमस्ता
नवमितितानवस्य गुणत्वेनानेन षष्ठीसमासनिषेधात्।ऽ। अधिकारेणैतावलइतिनिर्देशात् कथं। विपुलादुपरिमदुपरितथा
मतेतिनमगृह्य भितथा। आदेयाः किंकृते भोगाः कुंभकर्णतया विनाइतिभट्टिः अव्ययेन समासनिषेधात्।ऽ। सताल्वे
नसाहचर्यात् अव्ययस्यकृतेग्रहणमितिरक्षितः। यद्येवमनुर्थत्त्समयेति। अन्वयस्यसमयाय त्समयेति पूरणगुणो स्यादि
नासमासाभावः। अत्राव्ययेसमयाधा शब्देनौनुशब्दोऽत्रोच्यतेनद्व्यवृत्तिलादनव्ययलेसमासउक्तोन्यासकृता।ऽ। पूर्वपक्षा
वसरे इदमुक्तमितिरक्षितः साहचर्यआश्रिसप्रकारांतरंवा तत्। कथं सत्कर्तव्यमिति।ऽ। तृतीयसमासो यं सुहितार्थ
त्स्यसमर्थाः। तद्योगे षष्ठी समासनिषेधात् ज्ञापकात् एवंच नाग्निस्तृप्यतिकाष्ठानां नापगानां महोदधिः। नोतकः सर्वभू
तानां नपुंसां वामलोचना। यद्येवं फलैर्नानारसैः श्रुक्षैः स्वादुशीतैश्चवारिभिः तन्नास्तां भ्राजयुमतीप्रपन्नकस्य पूरि
यमितिभट्टिः। फलैर्मेः स्वासितंभवमितिच।ऽ। ज्ञापकसिद्धंनसर्वत्रेति ज्ञापकसमुच्चयः। अथवा विवक्षिताततः कारकाणि
भवंतिइतिकरणविवक्षयां तृतीया शेषत्वविवक्षायां षष्ठी क्तेन। कथं कल्हंराम सहितः कृतवानिति भट्टिः। तथाराज
पूजितः। ईश्वरज्ञानः अनेन समासनिषेधात्।ऽ। तृतीयासमासेन राजपूजिताद्यमः इत्सन्तुन्यासः। शेषषष्ठ्यावासमासः
कार्यः। एवंप्रकरणमिदं स्वरार्थं तथा स्वार्थापंचसूत्रीतिभाष्ये। कर्माणिच। कथं गृहवित्तपित्रा मित्रेण।ऽ। शेषषष्ठ्या

 भविष्यति। कथं शब्दानुशासनं लिङ्गानुशासनमिति। ॥ उभयप्राप्ताविति षष्ठ्या अयं समासनिषेधः वकारस्यावधारणार्थत्वा
 त्। कर्तरि चेति सूत्रारंभाच्च। यदि सामान्यकर्मषष्ठ्याः समासनिषेधः अनेन स्यात् अपां स्रष्टा इत्यादौ निषेधे सिद्धे कर्तरि चे
13 त्यनर्थकं स्यात्। न च प्रैष्यकारयिता प्रैषस्य हर्ता यिता इत्यत्र हृक्रोरन्यतरस्यामिति कर्मत्वाभावे कर्तृषष्ठ्यां तस्य समासनिषे
धार्थं भविष्यति तृजकाभ्यां कर्तरि चे सेवत। सिद्धेः यत्तु तत्रोक्तं बलग्रहणमुत्तरार्थमिति तच्च कर्तरि चेति सूत्रे स्थितं अ
थवा षष्ठ्ये वात्र नास्ति प्रसङ्गः सा हि यस्मात् कृदभिहितः तत् क्रियायाः कर्तृकर्मणोः षष्ठ्याभावं इह ण्यन्तादभिहितः प्रैष्य
श्च अण्यन्तः कर्ता न च शब्दानुशासनमिति सूत्रात्पुभयप्राप्ताविति षष्ठी हेतुप्रयोग इत्यतः प्रयोगग्रहणानुवृत्तेः कर्तृप्रयोगे तत्स्थाना
त्। योगग्रहणं कृत्त्वासंबध्यं न च कर्मणा कर्तृत्वाकृतोन प्राधान्यात्। एतेन कर्मणोः प्रयोगे उभयप्राप्ताविति नियमात्। कर्तरि तृ
तीया ज्ञापकं वा अंतर्हर्मिना दर्शनमिष्यतीति रक्षितः। एवं च उणि सूत्रतस्य ग्रहणं भवसेवने ति सिद्ध्येत स्येनि कर्तरि षष्ठी न्या
य्यो मतः अत्रापि ग्राह्ये कर्मणि गम्यमाने नियमात्। ॥ कर्तरि षष्ठी समस्यं सस्कृतत्वात्। शेषषष्ठी कर्तरि सा। यत्तु न्यासकृ
तोक्तं यत्र सामर्थ्यं प्राप्तमुभयोरुपादानं स उभयप्राप्तावित्यस्य विषयः अन्यथा कर्तृकर्मणोः कृतीत्यस्य विधेरुभयप्राप्तावि
त्यस्य च विषयविभागो न स्यात्। नः कर्तृकं कर्मास्तीति न्यायादिति तदयुक्तं पुरस्तादोअभिहिते कर्तरि नियमाभावात्
अथानभिहिताधिकारामनंगीकृत्योच्यते। एवमप्यकाकारयोः प्रतिषेधो वक्तव्यः। शेषे विभाषेत्येताभ्यां नियमव्याव
र्त्तौ कर्तृकर्मणो रित्यस्य कृतार्थत्वात्। ॥ अस्य विधेरिति व्यधिकरणे षष्ठ्यौ तदयमर्थः। कर्तृकर्मणोरित्य विधिः कर्तरि चेति
उभयप्राप्तावित्यस्य यो विधिः कर्मणि वेति एतयो विषयविभागो न स्यात् सर्वत्र कर्मणि चेति निषेधसंभवात्। अपरं तु कुलानो 

क्तं। कर्त्तरि च। कथं भीष्मकुरूणां भयशोकहेतोरिति।३। तृप्तं तमेतत्। न च तत्र न चलोकाव्ययनिष्ठेति षष्ठीनिषेधः। यतः तृकाभ्या
मिस। नचः सानुबंधकस्योपादानं न लिंवृत्सर्थेत्तापयतीत्यनायोगे क्वचित्षष्ठीति न्यासः। द्वितीयेति योगविभागाद्वा समासः शे
षे षष्ठी सम्बन्धः कुगतिकथमलं कुमार्य्यैइतिवाक्यपर्य्यादयोग्लानाद्यर्थे चतुर्थीति नित्यसमासे शेषे षष्ठी सम्बन्धः।३। नमः स्वस्ती
ति चतुर्थीविधानसामर्थ्यान्नित्यसमासेपि वाक्यमितिरक्षितः। नन्वलं कुमार्य्यै शोभनायेइति सविषणे समासाभावाच्च चतुर्थी
विधानं कृतार्थं।३। मुक्तौ सामर्थ्यं बाध्यं कथमधीत्य। कर्मप्रवचनीयानां प्रतिषेधइतिवचनात् अध्येतुः सोपसर्गस्याध्ययना
र्थत्वात्। अधिशब्दस्यानर्थकत्वे अधिपरी अनर्थकाविति कर्मप्रवचनीयत्वात् समुदायार्थैः उपचर्य्य धातुत्वं न्यासउक्तं
।३। अध्यापकधूर्त्तैर्जातिरिति ज्ञापकानामनित्यत्वं यथा सुप्लुतं अनिप्लुतमित्यत्र उपसर्गलक्षणसत्त्वाभावः कथमनुकुरू
ते। कुरुतेनामामितिदंडी कुशब्दो व्ययं पापार्थे समस्यतइति पातिपादनं। ईषदर्थे चेति ज्ञापकं प्राविकमुपाधिवचनमिति न्या
सः पृथिवीवाविनः सप्तमी समासो वा। उपपदा कथं साधु। खलुपयसः पनमिति कर्म्मणि चेत्यत्र वृत्तिः कर्मणि च येन संस्पृ
र्शाविकर्त्तुः शरीरसुखमिति कर्त्तरि अनेनानित्यसमासात्।३। शरीरसुखस्याविपक्षितत्वान्नात्रातकर्मणि च ल्युट् किं तर्हि
ल्युडेषुनेनेति रक्षितः। कथं। शिखाभिराश्लिष्टइवांभसां निधिरिति माघः तथा त्रिशाकल्पस्य निधिर्जवानामिति रघुः। पारत्वो
त्कर्मण्यधिकरणे चेति किंप्रसयेन नित्यसमासात्।३। पदसंस्कारपक्षे साधुः। अनेकं कथं ररेवकेनास्ति दोषइति सुविसाधि
कारकारणात् तिङः समासाभावात्।३। विभक्तिप्रतिरूपकोपमास्तिशब्दः। निङ् तत्वेवास्ति क्षिरादिवचनं कर्त्तव्यमिति समा
सः उपसर्जनं। कथं पयेमौथिनिमितिभट्टिः। अपेतापोढमुक्तेति समासे पूर्वनिपातात्। क्रतत्कूर्थादिसूत्रेवृत्तिः सूत्राणां

वृत्तिः सूत्रं तदधीते इति त्रितयं वस्त्रादिना कृ एवं सूत्रशब्दस्य पूर्वनिपातः स्यात् । उ० । वृत्तिश्च सूत्रं चेति द्वंद्वः कथं मनुः सपामीस
पत्नीमतः । उ० । राजदंतादित्वात् माता सपत्नी अस्या इति वा कृते आहिताग्न्यादित्वात् स्त्रियाः पुंवद्भाषितेति मातेति समानायामप्रा
कृतौ भाषितपुंस्काभावात् । सपत्नमातेति च भवति सपत्नी इव तत्रानुरिव माते उपचारेण कर्मधारयात् द्वंद्वे कथं प्रपदाप
समलवेन्दुदरभिमधिरूढति निम्नतिपर्यपयइति सर्वाणीनामेकतरस्य पूर्वनिपातसंभवात् ॥ उ० । लक्षणहेत्वोः क्रि
यायाः इति वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरिति चरापकादनि सभिदं । अल्पाच्च साधारणे भूषणभूष्यभा
वइति कुमारः । उ० । पूरणाद्ध्येयत्वात् परिव्यते भ्यः क्रियइति ज्ञापकादस्यानित्यत्वात् । कथं शिष्योपाध्यायं । छात्रोपाध्या
यमिति अध्यायः नत्तो विप्रकृष्टाख्यानामित्यत्र रक्षितो दाहृतः अभ्यर्हितं चेति पूर्वनिपातात् लक्षणहेत्वोः क्रिया
याइति ज्ञापकात् सामान्येन पूर्वनिपातप्रकरणनित्यत्वं ज्ञापसूत्रे रक्षितेनोक्तं । एवं च पार्वतीपरमेश्वरावितिवा
दथवा प्रमोक्ष्यपेक्षया अभ्यर्हितत्वं ग्राह्यं । भ्रातुश्च ज्यायसः इति वक्तार्भात् । इहतु स्मृते हि माता सर्वेषां अभ्यर्हिता अ
न्येत्वाहुः । पार्वतीपातीति पार्वतीपः शिवः रमायवधिजेद्विवेति त्रिकाण्डशेषः । मयाईश्वरः रमेश्वरत्वा सो विष्णुः तौ च द्वंद्वः स
प्तार्थः । सप्तमी । कथं शंभुरकुंभहस्ताप्यावराः पुष्पकवनेचान्येतथा राजा अर्हं तं मधुपर्कपाणिरिति भट्टिः शंभुरद
कुं भेह सो मेषातथा मधुपर्कपाणिरस्येति बहुव्रीहि दितिजयमंगला । कथं वज्रपाणिः कमण्डलुपाणिः छत्रतः पद्महस्तः सूर्यः
। आहिताग्न्यादिषु दृष्टप्रारतगणपाठस्यात् तंत्रत्वात् अवास्थितदिभाषात्वाद्धनित्यस्य परनिपातः एतदेवोच्यते प्रहरणा
र्थेभ्यो निष्ठा । सप्तम्योपरेत्वा भवत इति जाति कालसुखादिभ्यः परवचनमित्यादि । एवं च पदक्षपादः प्रवोमुनीनामित्यत्रे पा १४

देक्षो स्येव कुब्री हो गंधादिभ्यः पावचनमिति पादस्य परप्रयोगः। निष्ठा। कथमनभ्युत वुभुक्षुतौ। उ०। सर्वनामसंख्ययो रूपसंख्योनव
चनात् प्रथमचरमेत्यादिना अल्पशब्दस्य सर्वनामत्वं। बहुगणवतुडति संख्येति वा कुमन्द्रास्य संख्यात्वं आतग्म्यादिलात्। दुर्घट
वृत्तौ अपरः पादः॥ ॥अकर्मणि द्वितीया। कथं हा पितः क्वासि हे सुभ्र इति भट्टिः। हा तात हा अंबेति मालतीवाक्यं। हायोगे स्यपि द्वश्य
तइति द्वितीयसंभवात्। उ। हाशब्दोयं शोकवचनो लोकं तरितापित्रादिः संबोध्यते। तत्र संबोधनप्रथमायां प्राप्तायां अस्य हा अपि श
ब्दस्य मभिचारार्थलात्। संबोधने प्रथमापि भवति। अवाधे चेति नाद्वित्वमावाधस्य हाशब्देनैवोक्तलादिति रक्षितः। किंचैवं हा हा
गिरो निष्फल इति न सिध्यति तस्मात् लोकपूर्वसंबोधनवचनो वो हाशब्दः हा हा गिर इत्यत्र तु शोकार्थ एव संबोध्यस्याभावेन तु। अतो
अत्र द्वित्वं। भागवृत्ति वसुन्धरा हत्याशोवेक संबंधेष्वप्यपवादो। द्वितीया संबोधने रूपपद विभक्तेः कारकविभक्तिर्वलीयसीति प्र
थमा। अत एव हा हेमंता त्सः प्रयतः कमलवनरिपुः कामसंभोगरम्यो हाकष्टं क्षाश्रवतरवंडा भ्रमारगुणपतः। ब्धितां स्तेसु गंधः॥
आमते चैत्रमासे दशादिशि चिरं श्रूयते कोकिलानां हा कष्टं किं करोमि प्रियसम विरहे कामदूतो वसंत — ति कथां दिशं गंतव्यामिति
कादंबरी। तथा सभानप्रवेष्टव्यं वक्तव्यं वासमंजसं अब्रुवं विब्रुवं चापि नरो भवति किल्विषी तिगम्यादेः सकर्मकत्वात् कर्मणि
नव्य विधाने अभिहितत्वात् कर्मणि द्वितीया न स्यात्। उ०। पद संस्कारे कर्मणो विवक्षायां भावे तव्यप्रत्ययः। उ०। नरकालं कर्म सं
बंधे द्वितीयेति कश्चित्। तन्न षष्ठीप्रसंगात् तस्मात् उद्दिश्ये त्यध्याहार्यं तत्कर्मेदं अथवा गत्यर्थकर्म्मणी द्वितीयाग्रहणा
त् षष्ठी वाधित्वा द्वितीयात द्दर्हमिति निर्देशात् कर्तृकर्मणोः कृतीसत्वाद्वा। एवं भ्रांतदेशो मनेकदुर्गविषममितिवा। अत्रापि न पुंस
के भावे क्तस्योपसंख्यानमिति षष्ठीस्यात् मदिनशेषषष्ठ्यास्य प्रसारम्यानतत्वात् शेषविवक्षयान् षष्ठीसुच्यते तदाभावनिष्ठया।

दुर्घ० वृ०
१५
15

ष्येतत्त्वासिद्धमिति अध्वविवक्षायां कालाध्वनोरिति वा द्वितीया। कथमुपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति जातकमत्र। उ०। परिबुद्धी
नां उत्तरलबुद्धीनां उपरि चरतीत्यर्थः। एवं चाम्रेडितत्वाभावात् न द्वितीया। यद्वा प्रातिपदोक्तस्य उपर्यध्यधसः सामीप्ये इति कृतद्वि
त्वस्य ग्रहणं अत्र तु वीप्सायां द्विर्वचनं कार्यं कथं चैत्र यावत शीत। उ०। ततो अन्यत्रापि दृश्यत इति दृशिग्रहणस्य प्रयोगार्थानुसारि
त्वात्। यथा बुभुक्षितं न प्रतिभाति किंचिदित्यत्र प्रतिभातियोगे द्वितीया तथा यावच्छब्दयोगे चापि एवं पुरुवाराधनमृते इति माहिम्नः
प्रयोगः ऋतेयोगे द्वितीयेति कश्चित् तन्न अन्यारादितरर्ते इति प्रातिपदपंचमीबाधकहेतोरदर्शनात्। तस्मात् द्वितीयेति योगविभा
गः कर्त्तव्यः। ऋतेयोगे द्वितीयार्थः। तथा च चान्द्रसूत्रं ऋते द्वितीया चेति। कथमेतमतं डितं विद्याद्याकृष्य स्मारणयोरडि दिति विद्या
दिति क्रियायोगापेक्षया अडितमिति स्यात्। उ०। नास्य विद्यादित्यनेन संबंधः। किंतु भावतीत्यध्याहार्य्यं विमादिवसात् क्वात्स्त्वास्त
नश्रीः। पूर्वं भवत्पदुरासीदिति। उ०। कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामिति कर्मत्वं तदर्थं पालः कर्त्तव्य इति। उ०। सामा
न्योपक्रमेण विशेषणाभिधानात् प्रथम प्राप्य इति वाध्याहार्य्यं। विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति कुमारः। कथमादसु
नादररसबोधिसइतिमाघः उ०। संप्रति भवं सांप्रतमिति न सांप्रतमिति तद्धितांतमव्ययं तथोक्ति शब्दः कृदंतो मयं तत्रश्च कृत्तद्धि
ताभ्यामभिहितत्वान्न द्वितीया। अव्ययेनाभिहितेपि न द्वितीया कृत्तद्धितसमासैः परिसंख्यानमित्यस्य संभवदर्शनार्थत्वादिति
वक्षितः। कथं तर्हि अधिक्लीप्रस्तावे न्यासकृतपरिगणनं स्वीकृतवान्। उ०। अभ्युपगमोक्तत्वात् उपलक्षणे त्वधिशब्देनोक्ते
प्याधारे सप्तमी। शौंडादिगणे अतः शब्दस्याधिकरणप्रधानस्योपादानात् ज्ञापकात् कथं तर्हि वनं सपर्णीमिति तां पुराविदर
ति। उ०। मायामासप्तशुद्धानशुद्धकर्मभिरिति कुमारसंभवः इतिशब्देनोक्तत्वात्। उ०। पुराविदर इत्यस्मादनन्तरं इतिशब्दो द्रष्टव्यः॥

१५

कथं सनैरा॰ क्रा। माम मनसश्शुद्धलं शुद्धकर्मभिरिति कुमारः। कर्मेर्गत्यर्थत्वात् गतिबुद्धीत्यादिना कर्मत्ववानेतियुक्तं। अत्र कर्मभिरवष्टंभे
वर्त्ततेगतौ। कथं वटे वटे वैश्रवणः। शृक वत्यां प्रसे मयेतिपठनात् क्रियया व्याप्यत्वेन कर्मत्वात् तथा मन्ये धातुर्विभाषितइतिनमनुक्रिया
व्याप्यमानत्वात् कर्मणि द्वितीतिवृत्तिः इति द्वितीयास्यात्। उ॰। वाक्योर्थस्य कर्मत्वात् द्वितीयादिज्या प्रातिपादिका द्वीयते। क
थं वक्ष्यति कर्मणि। द्वितीयाइतिवृत्तिः। इतिशब्दाप्रयोगात्। उ॰। अनुकार्यानुकरणयोर्भेदाविवक्षया मर्थवत्त्वाभावात्। कथ
पक्त्वौदनो भुज्यते। पाचिक्रियायां कर्मत्वे अनभिहितत्वे द्वितीयाप्रसंगात्। उ॰। प्राधान्यात् भुजिक्रियापेक्षया अभिन कर्मत्वा
त्। एवं च ग्रामो गंतुमिष्यते पच्यातेः ओदनो कुमिसेदिसेत्स्यति। कथं ततोनुकंप्यां दिशा दस्यत सा मौघ्यपर्यस्त रूच क्षि
तस्येति कुमारः। उ॰। माघाणामस्तीयादिति वतु शेषविवक्षायां षष्ठी अंतरांतरेण कथमावयोरंतरा वेदिरिति अंतरायोगे
द्वितीयाप्रसंगात्। उ॰। सावधारणावधिमध्यत्वे द्वितीया अतएव त्वं। वभवांतरा कमंडलुरिति वकार एवार्थ इत्यनुन्यासः। ए
तच्च पूर्वसूत्राच्चकारानुवृत्तेः यद्येवं च कथं वैदेहीमंतरा कुरु इति भट्टिः। उ॰। केचिद्विशेषेण मध्यमिच्छंतीति गसथी कथं
महोपकारं वैदेह्यस्य कीमास्ति तस्य गच्छतयानन चतस्य मोक्षइति भट्टिः। यतः चतुर्थीवेतिवक्तव्ये द्वितीयाग्रहणपरामर्षिकृ
द्योगात् षष्ठी वाधितुमिति न षष्ठ्यसंभवः। उ॰। प्रार्थनादिक्रियाया व्याप्यमानत्वात् गमनादेः। कर्मत्वे क्रियाकर्मणोभिन्नेपमा
णस्य ग्रामादेः संप्रदानत्वे चतुर्थी प्रार्थनादिक्रियाया अभेदे गमनादेरकर्मत्वे गमनक्रियाव्याप्यमानाचान ग्रामादेः कर्मत्वे द्विती
येति सूत्रं भाष्यप्रतीसाख्यातं। एवं च सामर्थ्याभावात् कृद्योगषष्ठ्यप्रसक्तेः चान चैतदृशीनेअजां नयती ग्राममभिसाद्ये संप्रदानत्व
मनभिधानात्। शीनं ग्रामं गच्छतीत्यत्र युगपद्देशभेदाविवक्षायां भेदे क्रियाकार्मत्वे शोभनस्य कर्मत्वभेदे ग्रामस्येतिन दोषः। पूर्व

वृत्तिदर्शनात्प्रवृत्तिकृतोक्तं तदपि प्रमाणमंतितथा च भट्टिः तस्याधिकगमं वनायेति शेषविवक्षायां षष्ठीति पुरुषोत्तमः। चतुर्थी कथं का
कस्यास्य विवेकशून्यमनसो मा हे हिमुग्धे बालिमिति संप्रदानमिति चतुर्थ्याभावः। उ०। शेषविवक्षायां षष्ठी। कथं कुर्वीत हितमात्मनः
तथा रोगिणां हितमौषधमिति वैद्यकशास्त्रप्रमाणोगुणिनां हितोइति भट्टिः हितयोगे चतुर्थीवृक्तव्येति वचनात्। उ०। हितं भक्षा इस
त्रतद्रस्य पथ्यमित्यतो अस्ये स्तेनुवृत्तेतिशापयति हितयोगे षष्ठ्यपीष्यते। नवस्येस्यस्य चतुर्थ्यंततया विपरिणामः। कर्तुं नमः। एवं
चतदस्मै दीयते नियुक्त मित्यत्रास्मै ग्रहणमिहैवकृतं स्यादिति रक्षितः नमः। कथमिदुनाप्रविभज्यते नमस्कृत्य मुनित्रयअनस्ते
षां विवेकार्थं नमस्कृत्य मुनित्रयं नमोयोगे चतुर्थी संभवात्। उ० करोतिरत्र क्रियासामान्यवचनत्वो व्यनक्ति वचनः। नमः शब्दस्तु
तद्योतकः। अत एव द्योत्यद्योतकसंबंधे साक्षात्लभतीनिचेतिगतिलं नमस्पुरसोर्गत्यर्थोरितिसत्वं। एवं च नमस्य त्यमुनित्रय
स्यकर्मत्वे उपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीया॥ एवं च प्रे[illegible]स्यशितिकंगमइति कुमारचारितं न घटते। उ०। क
र्मणः शेषत्वे माषाणामश्नीयादितिवत् षष्ठी प्रसंगेन मस्यत्वीति चतुर्थी क्रियाग्रहणं कर्त्तव्यमिति च। प्रणम्येति किं विभक्ति
प्रतिरूपको निपातः। नमः पर्यायो वा। यद्वा तु नमोर्थ एवकरोति क्रियया व्याप्यमानत्वोदानमसो योगे चतुर्थीगतिलचनाद्योत्यद्यो
तकसंबंधाभावात्। तथा च भट्टिः। रावणाय नमः कुर्मास्यात्तीते स्वस्तितेध्रुवं। तथा नमस्कारदेवेभ्यः पर्णशालामुमोचहेति
रक्षितः। कथं ममायं प्रभुः प्रभुर्मल्लो मल्लायेति वत्। अलमिति पर्याप्त्यर्थस्य ग्रहणमिति चतुर्थ्याभावः। उ०। भाषेत्र द्विधा व्यायमा
तमालमिति पर्याप्त्यर्थस्य ग्रहणमिति इहापि यथा स्यात्। प्रभुर्मल्लो मल्लायेति मल्ल इति पर्याप्त्यर्थस्य स्वरूपस्य ग्रहणमिति
माभूत्। अलं बवेलोचनेनेति एवं चेकस्य मते प्रभ्वादियोगे षष्ठी अन्यस्य चतुर्थी स्तत्र कृतापि स्वीकृतमिदं। तस्मै प्रवेतिसंत।

ण

पादिभ्यः सपष्ठा ग्रामणीरिति निर्देशात् भ्यां तथा न भवति। नाम्नो यस्य कश्चनापुत्रो यस्यैतत् कश्चन। प्रोष्ठपदा नाविस्सस्यरूपं। कर्तृकरण
कथं नादंष्ट्रगतवति सक्षमं स्वपदे भूतानामधिपतिना शिलाविताने तिभारविः। यतोधिपतेः कर्तृकरणत्वे न क्तक्तवतोः कर्तरि वि
धानात्। पृथक् कालां च करणत्वात्। गम्यमान यर्थ अधिपतिरेकोक्तः स्यात् क्तवतुना। उ०। हेतौ तृतीया द्रष्टव्या। कथमेका किना न
गन्तव्यं यदि कार्यशतैरपि। कर्कटपशुमात्रेणेति पशुरिव पशुः। यद्वा पशुः कर्कटमात्रेणेति पाठः। तत्र यमपशुपक्षे सर्पः। काक
सहितः सर्पः काकसर्पः कथं न पतिगृह्याद् उत्तरेण मदीयमिति माघः। उत्तरेणेति विभक्ति प्रतिरूपको निपातः। प्रकृत्यादिभ्य उपसं प
ख्यानमिति वा तृतीया एकमुनिपक्षे उत्तरेण पथा गले सर्पः। एवं च कारणे तृतीया एनपुस्सयेनु एतया द्वितीयेति — न प्रतिगृह्या
द्यात् द्वितीया स्यात्। कथमुच्चारणार्थाव र्जितभावे न नमसिति। निकुञ्जादिस्त्रेरक्षितः। उ०। प्रकृत्यादित्वादिसेवा इति स्वभूत लक्ष
णाइति वा। कथं प्रभूयते भूसः। उ०। प्रभूरिति दुः वा आशैस्यादि नाश्मन्॥ सहयुक्ते। कथं। वात्सोशत्रुघ्नमुदारचेष्टमेकः सुमित्रास
हलक्ष्मणेन। लक्ष्मणस्य ज्येष्ठत्वाद्प्राधान्यास्याप्युक्तत्वात् उच्यते। वनस्य क्रियादिसंबंधः शब्देन प्रतिपाद्यते तस्य प्राधान्यं। तत्रो
क्तं। यास्मिन्नाते प्रसज्यते ति व्यपदेशः तस्य क्रियादिसंबंधात् प्राधान्यं शत्रुघ्नेकनीयसि प्रसक्तेते तथाव्यवहारात्। तस्य प्राधान्यमिति
जयमंगला एवं च शशिना सह याति कौमुदी सहमेघेन तडिल्लीयते इति कुमारः। तथा उपाध्यायेन सहागतः छात्र इत्यादि सिद्ध्य
ति। विभाषागुणे स्त्रियां कथं इह भूतले घटो नास्त्यनुपलब्धेः अस्त्रिया मिति निषेधात्। उच्यते अनुपलब्धेरिति भाष्यकार
वचनप्रामाण्यादिति विभाषागुणे इत्यत्र न्यासः। अथवा बुद्धिपलब्धेर्ज्ञानाभिस्संभिन्नार्थापतेर्बांश्यदर्शने। एवं चाविद्यमानाउपलब्धिय
स्मिन्नतान विशेषइति बहुव्रीहिः। विभाषागुणइति योगविभागादिति। उ०। उणादयो बहुलमित्यत्र प्रकृतेस्त्वनुदृष्टे रिति सिद्धये न्यासः।

दु० वृ०
१७
17

अपादाने॰ कथं कारकात्॥ महावणकः॰ संवादयतीति लेखमा विका उच्यते। ल्यप्लोपे कर्मण्युपसंख्यानमिति पंचमी॰ कारकस्याप
यमर्थः। कथं शृहरस्य हर्म्यवदिति। तथा कुटकौटिल्य इत्यस्य आरभ्य कुङ् शब्द इति यावदिति वृत्तिः उच्यते। प्रभृतिपर्यायो ममारभ्य श
ब्दो निपातः। ततश्च कार्तिकः प्रभृतीति भाष्यकारवचनात् पंचमी। यद्वा आरभ्य शब्दो ल्यबंतः। ततो द्वितीयां तादाद्य दिभ्यस्त्वसुप
संख्यानमिति तसिः। कथं। विंशतेरकोद्रोणः। अधिकाधिकसंबंधे प्यथाभावं उच्यते। यस्मादधिकमिति निर्देशादिति रक्षितः
।कथं जीर्णमन्नं प्रसंशीय। दृष्टं निगतवेवनी। रणे प्रसागतं शत्रुं सस्यं च गृहमागतं। रण इति युक्तं उच्यते। अपादानस्याविवक्षायां स
प्तमी यं यस्य च भावेनेति। प्रसंशी सावश्यके णिनिः। प्रशांस शब्दात्॰ ब्रीह्यादिलक्षण इति। दृष्या दिति दृशो लिङि रूपं। शसु घातो
र्लिङि॰ शंशासी दिति स्यात्। यदि नामाकुर्वोऽन्मत्ता किमर्थं दरिद्रता दारिद्र्यादितिमुर्खं लमहोदुः स्वपरंपरा दारिद्र्यादिस्यमुक्ता
पंचमी हेतोरभावात्। उच्यते। ल्यबलोपे भविष्यति। अन्यारादि। कथं। पूर्वकायस्येति उच्यते। तस्यापरमाम्रेडितमिति निर्दे
शात् अवचवयायिनो दिक्शब्दस्य योगे पंचम्यभाव इति रक्षितः। कथं समुदायिभ्यो अनन्य समुदायः। ग्रहणवताप्रा
तिपदिकेन तदंतविध्यभावात् उच्यते अन्य इत्यर्थग्रहणं। नञ्समासस्य चोत्तरपदार्थप्रधानत्वात्। तदर्थयोगो अनुपप
त इति रक्षितः प्यष्यतस्यर्थ। कथं प्राणिनायं विभाषापरावराभ्यां यत् सुजित् सुजंत॰ किं तर्हि परया बा। तत्र यमर्थे आ
घादित्वात्तसिः। सप्तम्या धि। कथं। दात्रेण धान्यं लुनातीति निमित्तात्कर्मसंयोग इति सप्तम्याभाव्यं। उच्यते दात्रमि
ह करणं न हेतुः हेतुः कर्त्तारं व्यापारयति। कारणं तु कर्त्रा व्यापार्यत इति हेतुकरणयोर्भेद इति रक्षितः। कथं वेतनेन धान्यं लुनाती
ति उच्यते। निमित्तमिह प्रयोजनं॰ अभीष्टं। संयोगश्च संश्लेष इति रक्षितः॥ यद्येवं यूपाय दारु वीनमाइस्रु हि यूपः प्रयोजनं दारुण

चसंश्लेषोस्यउच्यते। तादर्थ्ये विवक्षयायचतुर्थी। कथमंतर्धौ येनादर्शनमिच्छती सत्रांतर्धौ वितिनिमित्तसप्तमीतिन्यासः। उ
च्यते। अतएव निर्देशात् क्वचिन्निमित्तमात्रे संबंधमात्रे वास्यसप्तमीतिरक्षितः। कथं जन्मजन्मपदभ्यस्तं दानमध्ययनं तपः। जन्म
नीतिप्रयुज्यते उच्यते जन्ममहचरिते काछे जन्मशब्दस्य वृत्तेः। कालाध्वनोरिति। द्वितीया। कथं। गुवाकः कल्पितः पततिशय्यानेनभु
क्तमिति। शयनक्रियया जनक्रिया लक्ष्यते उच्यते। विसअनभिले। उच्यते। नस्य कारकत्व आहितं त्वं चेतिभागवृत्तिः कथं। मंवाः हि
क्रोशंतीति गौणे प्रथमा। यथा द्रोणपरिमितो द्रोण इत्यत्र परिमाणस्य सव्यपेक्षत्वात् मात्रग्रहणात्र प्रप्नोतीतिः परिमाणग्रहणं क्रि
यते। तथात्राप्युपचारपेक्षत्वान्नस्यात् उच्यते। वर्णोवर्णेनेति ज्ञापकात् उपचारसव्यपेक्षेपि प्रथमः कथं यस्य तस्य प्रसूतस्य
गुणवान् पूजितो नर इति प्रसूतस्ये सत्र हित्र हि प्रथमा युक्ता उच्यते प्रसूतः सइत्साधपाठः। शेषो कथं तदस्मिन्नकमिति
आयका विकसंबंधे षष्ठ्या भाव्यं। तदस्मिन्नधिकमिति निर्देशादेवितिरक्षितः अवाधकान्यपि निपातनानि भवंतीति वचना
त्संख्यया व्ययासन्ने सत्र धिकं स्यादामित्यत्रोक्ता षष्ठी। कर्तृकर्मणोः। कथं। रक्षोगणं क्षिपथ न विक्षितात्मा। तथा धायैरामो
दमुत्तमामिति भट्टिः। उच्यते। तदर्हमिति ज्ञापकानित्यत्वाद्द्वितीया धायैरिति। धेटपाने। श्याद्व्याध्रिज्ञाणाः प्रयुक्। ततस्तृतीये
तिरक्षितः। कथं कृतपूर्वी कटं। अनभिहिते कर्तरि कृत्प्रयोगे षष्ठीप्रसंगात्। उच्यते। कृद्ग्रहणं नतिङ् स्यार्थ स्यर्थं द्वितीया विधा
नसामर्थ्यात्। अतस्तद्धित स्यार्थ स्यर्थमितितद्धितप्रयोगेन षष्ठी। उभयप्राप्तौ कथं। अउः क्तेनावाधा भवतीति स्यागापापचो
भावइत्यन्यवृत्तिः। तथा। क्रुटः स्त्रीपुंसयो वाधामाभूदिति सूत्रे द्विथौरि सत्रवृत्तिः। अकाद्योः प्रतिषेधो वक्तव्य इतिनियम
निषेधात् कर्तृकर्मणोरिति षष्ठ्या भवितव्यं। उच्यते अः प्रत्ययादिसग्रहणस्यात्र प्रश्लेषाद्ग्रहणमितिरक्षितः। वाधाभावेति

गुरोअहलइत्यकारः। कस्यच। कथंलम्यूरक्षितोमयाशीक्षितइति। मतिबुद्धिपूजार्थेभ्यश्चेतिअत्रचकारेणशीक्षितोरक्षितोहं
तइत्यादौसंग्रहादनेनषष्ठ्याभाव्यं। उच्यते। भूतक्तस्यायंप्रयोगः। भागवृत्तिकृतातुवरक्ताभूषस्यवांतनमिष्यते। मन्मतेनशे
षविवक्षायांषष्ठ्यत्रद्रष्टव्या· कथंदोषाणांविवर्जितंदोषैरितिस्यात्। उच्यते। नपुंसकेभावेक्तस्योपसंख्यानमितिषष्ठी। ध्या
त्वस्यहसितमितिवत्। यद्विकर्मणिनिष्ठातदाशेषलक्षणैवषष्ठी। दोषाणांसंबंधियदविवर्जितमित्यनुन्यासः। नलोकाव्य
कथं। सत्यातुरत्नाकरस्यजिष्णुवइति। तुइतिउकारांतग्रहणात्षष्ठीनिषेधात्। उच्यते। शेषविवक्षायांषष्ठी। तुल्यार्थै
स्तु। कथंस्फुरोपमभूतिशितेनशंभुनेतिमाघः कनोपमानवृत्तुतस्यपराक्रमस्येतिचंडी। अतुलोपमाभ्यामितिनिषेधा
त्। उच्यते। सहविवक्षायांतृतीया। सूत्रेतुषष्ठ्यर्थं। सहभावाविवक्षार्थंच। शंभुमेयत्रतुल्यार्थस्याप्रधान्याच्चनप्रतिषेधः
चतुर्थीच। कथंनिसर्गोभ्यः स्वस्तिभूयादितिउच्यते। नमःस्वस्तीत्यादौचकारस्तस्यैववाकस्यसमुच्चयार्थः। तेनाशीर्विवक्षायांष
ष्ठीवाधित्वाच्चतुर्थीतिवृत्तिः॥ ॥इतिशरणदेवदुर्घटवृत्तौद्वितीयाध्यायस्यतृतीयःपादः॥ ॥द्विगुरेक। कथंरुद्रैकादशीतिह
रिश्चंद्रप्रयोगः॥ समाहारद्विगौएकादशरुद्रीतिस्यात्। उच्यते। स्त्वास्तोमेडवक्तव्यइतिप्रमाणेदयसजिसत्रवाच्यं। रुद्रस्यपूर्वनिपा
तार्थंराजदंतादिः कल्पनीयः। एवंचषोडशीत्यादि। कथंपंचपूल्यइमाः उच्यतेएकशेषेभविष्यतीतिरक्षितः। कथमेकापूपीति
त्वादिरक्षितः। कथंचतुर्दशीमेघोद्यः उच्यते। एकस्मिन्नेवसमासेपितवकुदिशावाचागिराक्षुधेत्सजादिपाठात्हलंतात्टाप्। दिशा
शब्दोनद्विगौ। आवंतोवेतिपक्षेनपुंसकत्वेनपुंसकः। ह्रस्वतोरूपं अन्यत्रपक्षेसमुदायिभ्योअन्यः समुदायइतिदर्शनेउपसर्जन
ह्रस्वत्वेसमुदायिभ्योनन्यः समुदायइतिदर्शनेएकत्वाद्भावेपिद्विगोरितिङीपिचतुर्दशीतिरूपमितिपंचसुप्रस्तावेरक्षितः। चतुर्द

शीशानवमसमानिनी अमरः हलंतस्य दिक्शब्दस्य द्विगौ चतुर्दशी शामिति वा पाठः। द्वंद्वन्यप्रा। कथं। ग्रीवाकुक्षिललाटेभ्रुमि संक्षे
दः प्रशस्यते। तथा मुखनासिकाभ्यां यो वायुर्निःक्रामतीति उच्यते। दधिपयादेः राक[illegible]तिगणत्वादिति रक्षितः। नासिकास्तन
योर्ध्माधेटोरिति दृशादेर्नित्यत्वाद्वा। एकशेषेण वा। शाकपार्थिवादित्वाद्वा। नासिकाया विवरभेदात द्वित्वात् ललाटस्य जात्यपे
क्षया बहुत्वं। एवं चवंचुचरणेलौहितः शिताइत्यमरः। तथापातितेरथनागाश्वैरिति चंडी। दंतमुष्टितलेरिति च। साध्याभेदः।
जातिरित्यस्य परत्वमनभिसंधायोक्तमस्माभिः। अत्रानुप्रकारांतरं। दंतमुष्टितलैरिति। दंतानि भ्रिलब्धुरिका मुष्टिः। केचिद्द
तमुष्टितलेरिति कथयित्सठंति। दंतमुष्टितलयैरिति। अध्ययनतो। कथं छात्रोपाध्यायं नात्राध्ययनामेति कर्मसाधने ग्रंथक
तासत्सासन्तिरिति रक्षितः। संबंधाभ्यर्हितत्वादुपाध्यायस्य पूर्वनिपातो युक्तः उच्यते। पूर्वनिपातप्रकरणस्यानित्यत्वादि
त्युक्तं प्राक्। जातिरप्राणिनां। कथं। रंजितार्थविविधास्तनुशैला इति भारविः। उच्यते। तरुप्रधानाः शैला इति शाकपार्थिवा
दिः। येषां च वि। कथं देवासुरैरमृतमंबुनिधिर्ममंथे इति भारविः। उच्यते। देवानामसुराणां च कदाचित्को विरोध इति रक्षितः
।यत्र च द्वंद्वो विरोधमाचष्टे सोस्य विषयः। न चात्र द्वंद्वो विरोधमाचष्टे समंजस्यात्। सनपुं। कथं। त्वग्घोदकशशिमायाकारः स्त
नगिरिसागरविहार इति। समाहारद्वंद्वे क्लीबत्वप्रसंगात् उच्यते। सग्रहणं प्राप्तिध्युपसंग्रहार्थं। तेन सुबोरनाकाविति न क्लीबत्वं। न
गरांतद्वंद्वेन विहारस्य मध्यपदलोपी वा समासः। नपुंसकमेव वा पाठः। कार्थ्यः। अपथं। कथं। विपथः। कद्ध्वाकापथः समाइ
त्यमरः। पथः संख्याव्ययादेरिति क्लीबत्वात्। कुशब्दस्याव्ययस्य। कुगतिप्रादयः इत्यत्र गतिसाहचर्याद्ग्रहणं। अव्ययत्वं वा निः
संख्यातत्वात् विभक्तिस्वरप्रतिरूपकाश्चेति चकारादेति रक्षितः उच्यते। विपथं कद्ध्वा कापथं समाइति पाठः। कर्तव्यः। तथा।

क्लीबलिंगकारिकापथः संख्याव्ययादेरिति।लिंगमशिष्यम्।लोकाश्रयत्वादिति काश्चित्।पथइति कृतसमासांतनिर्देशादपि अतिप
थाः सुपंथाश्चेति कोशः अत्रासमासांत त्वं तु न पूजनादिति निषेधात्।सभागजाम।कथं।नृपतिसभेति कीचकवधः।अनेन क्ली
बत्वात् उच्यते।राजविशेषवाचित्वात्।गजपतिर्बलराजपर्यायइतिरक्षितः।यद्वा नृणांपतिर्यस्यां सभायामिति बहुव्रीहौ कर्म
धारयः।एवंच अनञ्कर्मधारयइत्यनुवृत्तेर्न क्लीबत्वं।परवल्लिंग।कथं गृहस्थूणंशसोर्णमिति वररुचिलिंगकारिका।अमरेलिं
गसंग्रहश्च अनेन परवल्लिंगता स्यात् उच्यते।अभिद्रवद्वन्द्वाभावादिति निवर्तपरवल्लिंगमितिवार्तिनिर्देशो व्यभिचारार्थः लोकाश्रय
त्वात् क्लीबत्वं।तथाच भाष्यं।गृहशशपूर्वयोस्थूणोर्णयोर्नपुंसकत्वमिति।एवमभित्रः शत्रुः।रात्राह्नाहाः।कथं।गणरात्रं निशा
बहव्य इत्यमरः।अच् प्रत्यन्ववपूर्वात्सामलोम्न इत्यत्र अजिति योगविभागात् अत्र अजितिसोमनंदी अत्रानेन पुंस्त्वं स्यात्।उच्य
ते।गणशब्दोयं बहुत्ववाची समूहवाची च।अत्र बहुत्ववाचित्वे गणानां रात्रीणां समाहार इति समाहारद्विगौ कृतसमासे समासां
ता अनवयवाचित्वे गणानां रात्रीणां समाहार इति समाहारद्विगौ कृतसमासे समासांता अनवयवा इत्यस्मिन्पक्षे नेअकारांतोत्तरप
दत्वाभावात् अकारांतोत्तरपदे द्विगुः स्त्रियां भाष्यत इति न स्त्रीत्वं।सन्नपुंसकमिति क्लीबत्वात्।पात्रादित्वाद्वा क्लीबत्वमिति अम
रकोशटीका।समूहवाचित्वे तु रात्रेर्गणसमासे राजदंतादित्वात् परप्रयोगे लोकाश्रयत्वात् क्लीबत्वं।शतं सहस्रं यथा तदुक्तं लिंग
मशिष्यं लोकाश्रयत्वादिति।तथाच नपुंसककांडे अमरः रात्र्याह्नाः संख्ययान्वितमिति गणशब्दस्य बहुगणवतुडतिसंख्येति
संख्यासंज्ञा एवंच द्विरात्रत्रिरात्रपंचरात्रादीनां क्लीबत्वं अभिधेयवल्लिंगापवादोयं।तेनाह्नो निर्गतो निरह्नो वेतिरक्षितः।कथं त
र्हि द्व्योरह्नोर्भवा पूजा ह्नो पूजेति स्त्रीत्वं।द्वंद्वतत्पुरुषयोरित्यनुवृत्तेर्द्वंद्वसाहचर्यात्।समासपदार्थाभिधेयस्य ग्रहणं।इद्गुरुभ

वार्थामिधेमस्तत्पुरुषः। टिड्ढित्वात्रात्र ङीप्। अनुपसर्जनादितिप्रतिषेधात्। अपथं। कथं अपंथानं तु गवश्वं ते सोदरोपि विमुं
चतीति। उच्यते। कृतसमासांत निर्देशात्। द्वितीयाटौस्वे। कथं। हे रोहिणि त्वमसि शीतकरस्य भार्या एनं निवारय पतिं सखि दुर्वि
नीतं जालांतरेण मम वासगृहं प्रविश्य। श्रोणी तटं स्पृशति किं कुलधर्म एषः। एनमिति न स्यात्। अन्वादेशाभावात्। उच्यते। श्रोणी
तटं स्पृशति किं कुलधर्म एष इति योजयित्वा एनं निवारय इति योज्यं। वक्रवेणीं स्पृशन्नेनां कृष्टांधूर्मू वि शिखा मे विनिवेणी। अत्र
एतामिति पाठः कर्त्तव्यः। अस्तेर्भूः कथं। लावण्य उत्पाद्य इवास यत्न इति कुमारः। अनेन भूभावेन भाव्यं। उच्यते। असगतिदीप्ता
दीनांचात्। अस्मादुभयपदिः। केचिद्धनुप्रयोगादन्यत्रापि अस्तेर्भूभावं नेछंतीति धातुप्रदीपः। ब्रुवो वचिः। कथं। प्रेष्य ब्रुवोरि
त्यत्र ब्रुविपित द्विषयः। उच्यते। वाफुलकत्वात्। विशास्ति गुणेन च यत्सचत इति कात्यायनवचनाद्वा। तथा अजेर्व्यघञपोरि
त्यत्र लाघवार्थं मज इति कर्त्तव्ये अजेरिति ईकारगुरुनिर्देशात् ज्ञापकात्। आर्धधातुकीयं कार्यमनित्यमिति सामान्यज्ञापकात्।
इकस्तिनवाच्यादेशः। तथा वकृतिः कटकृताजनेरिति प्रयोगः। एतदेव अजेर्व्यघञपोरित्यत्र रक्षितेन तत्सूचितं ज्ञापकसमुच्चये पि
लिखितं अजेर्व्यघञपोः। कथं वीज्यते स हि संतप्तः श्वासमसाधारणानिश्चेति कुमारः। अनेन वीभावे कृते वीजितं इति स्यात्। उच्य
स्य ते। इजगतिकुत्सनयोरित्यस्य विपूर्वस्य रूपं। एवं दक्षिणवातवीजैरितीव। वाय्वो कथं त्वचित्रं व्यंजनमिति समरः। व्यंजनमिति नित्य
नस्यात्। अनेन पक्षे विभावात्। उच्यते। संज्ञायां दृसोव कुलमिति वार्त्तिकसामान्येन प्राकरणिककार्य्य व्यभिचारार्थमिति व्याख्या
तं। व्यवस्थितविभाषाद्वा। तद्राजस्य। कथं च त्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः संग्रामाध्वरदीक्षितो नरपतिः पत्नी
गृहीतव्रता। कौरव्याः पशवः प्रियापरिभवक्लेशोपशांतिः फलं राजन्योपनिमंत्रणाय रसति स्फीतं यशो दुंदुभिः इति वेणी। मवः

कुर्वादिभ्योण्यइतिअक्षत्रियवृत्तेः कुरुशब्दात्सावकाशइतिक्षत्रियवृत्तेः कुरुणादिभ्योण्यइतिण्यएवभाव्यं। तस्यचतद्राजत्वाल्लुक्। त
थाचभारविः। विशयतस्मिन्कुरवश्चकासतीति। उ। कुर्वादिभ्यइत्यत्राविक्षत्रियगोत्रग्रहणानुवृत्तेः सोपिक्षत्रियगोत्रवचनादेव
तस्यचतद्राजत्वाल्लुगिति। भागवृत्तिः। जपादिसमेतुद्वयोरेकत्विलाकुरुणादिभ्योण्यइतिकौरव्यशब्दस्तुसाधुततस्तत्रसाधुरि
तियत्। अकारलोपलोपौ। कौरव्यत्वात्कुरुणादिभ्योण्यइतिकौरव्यत्वात्कौरव्यौदुर्योधनोदरेणोदुःशासनादयउच्यंतेइतिवाच्यं।
यद्येवं। कथंपरस्परमभिकुरुकौरवास्त्रिमइतिभावः। तथासोयंमङ्कुजपंजरेनिपतितः संक्षतांकौरवाः कच्छादिपाठात्। मनु
ष्यतत्स्थयोश्चेतिवुञभावं। उच्यते। शब्दस्तुतत्रविवक्षाधीनत्वात्मनुष्याणांकुरुशब्देनातिचक्षितत्वान्नवुञ्। ततश्चतस्ये
दमर्थेअण्। जनपदविवक्षायांवाअण्। विषयोदेशइत्सणितात्स्यादितिभागवृत्तिः। कथंतस्यामेवरघोः पाण्ड्याः प्रतापंभावि
ष्योहिरेइतिरघुः। यतोवृद्धेकोशलेसत्रजनपदशब्दात्पंडोर्यण्वक्तव्यः इतियणितस्यतद्राजत्वाल्लुकाभाव्यं। उच्यते। पांडे
साधवः पाण्ड्याः तत्रसाधुरितियत्। अदिप्रभृति। कथंनपचाद्यजतादाचारेक्विपिलिङि रूपं। गणकार्यमनित्यमितिजयमं
गलः। भूवादेराकृतिगणत्वात्तत्रद्रष्टव्यइतिवृत्तकारणंतुयजादिसमासर्थं। कथंवासुदेवंपरिसज्यपयोन्यदेवमुपासते। उच्यते। अ
सगतिदीप्त्यादानयोरितिभूवादिकस्यउभयपदिनः। गातिस्थाघुपाभूः। कथंमाभैः शशांकममसीधुनिराजितराहुरितिसि
जलुकोभावान्माभैषीरितिप्राप्नोति। तथाचभट्टिः। मास्मभैषीस्तुयाधैककृतार्थोद्रक्षतेपतिरिति। उच्यते। आगमशासनानित्य
त्वात्। अस्तिसिचोपृक्तइतिनात्रेट्। ततोहभूलूञ्यादिनासिज्लोपे। सिचोविसर्जनीयः। अथवात्रनिर्देशोकाचइतियणादेशे
भूम्यइतिनिर्देशात्। एतन्मतेसिचोलोपोरूपं॥ ॥इतिशरणदेवदुर्घटवृत्तौद्वितीयोध्यायः॥२॥ ॥प्रत्ययः। धातोः कर्मणः क २०

थं नदीकूलं पिपतिष्यतीति। कूलस्याचेतनत्वादिच्छाया असंभवात्। उच्यते। पदसंस्कारेण। कथं मुमूर्षति मरणस्यानिच्छाविषयत्वात्॥
उच्यते। अतिदुःस्थितस्य मरणमभीप्सितमिति तदुच्यते। इह भूषं नाम तद्दुःखं येनेदं मरणं सुखमिति। वायोश्चाभ्यां। कथं धूमायंत
इवाश्लिष्टा इत्यनेन क्यङो भावात्। उच्यते। फेनञ्चेति वक्तव्यमिति केचित्। फेनधूमाभ्यामिति पठंति। चकारोनुवृत्तिसाध्यत्वादस्य।
एवं चात्र लालायितः फणीति भाष्यप्रयोगः। कर्तुः क्यङ् स। कथं कस्त्वं भो निशि केशवः शिरसिजैः किं नाम गर्वायसे चक्री चंद्र
मुखी प्रयच्छ धुक्षि न मे कूपी दोहिनी उपमानाद्यभावात् क्यङो अभावात्। उच्यते। गर्वयोगाद्गर्वः अर्शादित्वादच् रूपं। गर्वः पुरुषः।
ततो अगर्वो गर्वो भवतीति भृशादित्वात् क्यङ्। गर्वायते। अस्मिंश्चंद्रमसि प्रसन्नमहसि व्याकोमुकुंदे। लिबि प्राचीनश्च मुपेमुषि
त्वयि गते दूरं निजप्रेयसि। श्वासः कैरवकोरकीयति मुखं तस्याः सरोजीयति क्षीरोदीयति मन्मथोद्गमपि वंद्राकु चंद्रकांतीयति।
कथं कैरवकोरकीयतीत्यादि। उपमानादाचारे इति क्यच् विधीयते। यथा पुत्रीयति छात्रमिति। न चात्र कैरवकोरकादिकमिवा
न्यत्किंचिदाचरति किं तर्हि तदेव कैरवकोरकादितया आत्मभावमाचरतीति अतः कर्तुः क्यङ् सलोपश्चेति क्यङ् युज्यते। उच्य
ते आत्मानमित्युपमेयं द्रष्टव्यं तदयमर्थः। श्वासः कैरवकोरकमिवात्मानं भवति। एवं चोपमेयादाचारे इत्येव क्यच्। कथं प्रायः
पुण्यवतां देशे शारदि वर्षति वासव इति केचित्तु वाक्षरपठंति। निसंकोटिल्ये गतो। कथं यायावराः पुष्पजलेन चान्वे इति भट्टिः। गत्य
र्थत्वादनेन नियमात् समभिहारे यङो अभावात्। उच्यते। सर्वे गत्यर्था ज्ञानार्था इति। ज्ञानार्थत्वात्। लुपसद कथं वदैरावानचंचुरैरि
ति भट्टिः। चरेर्भावगर्हायां यङो विधानात्। उच्यते। क्रियागर्हा वात्र विवक्षितापद क्षिप्यर्थं। सलोपपाश। कथं लिखापयति घटाप
यतीति कायस्थप्रयोगः उच्यते। अर्थवेदसत्यादिना आपुगुक्तव्यः इत्यादिकारे युक्तिवावक्तव्ये आपुको विधानमन्यत्र भावार्थ। तेनलि

दु० वृ०
२१
५१

लिखापयतीत्यादिरिति रक्षितः आकारे कृते अर्त्तिह्रीसाद्गिना कु। कथं जुघुषु। घुष्यमालयाइति। निःसण्यत्वात्। उच्यते। घुषिरविशब्दे
इति ज्ञापकात्। विशब्दने णिज निस इति वृत्तिः अथवा अयमौ वादिकः परस्मैपदी। हेतुमति च। कथं रामो राज्यमकारयदिति रामायणं। त
था। सकलभुवनराज्यकारयामासतेन इति भट्टिः। दृष्टेरूर्ध्वं पुनरपि भयान् वाहयेद्ध्वशोषमिति मेघः। कोकिला विष्णुरूपेण राजक
न्यानजीहरत्। स्वार्थे णिजभावात्। उच्यते। विवक्षाधीनत्वात् लक्ष्यस्य णिजुत्सर्थः। हेतुहेतुमद्भावो विवक्षीयः। भुसभुत्तरकालं स्वा
र्थे वर्त्तते। स्वभावादिति आरोहयते हस्ती स्वयमेवेति अत्र रक्षितः। सकलभुवनभामकारयामासमेत्यत्र तु पादुकायाः प्रयोज्यक
र्मत्वेन हेतुहेतुमद्भाव इति जयमंगला। एवं कोकिलो विष्णुरूपेणेत्यत्रापि विष्णुरूपस्य प्रयोज्यत्वा। त्सिद्धिः। गुपू। कथं गुपितमि
ति गुपू रक्षणे इत्यस्य आयादय आर्धधातुके तिविकल्पात् गुप्तगोपायितमिति हि स्यात्। उच्यते। गुपगोपनकुत्सनयोरित्यतो निंद्या
यामायनुसत्ते इन्यत्र गुपितमिति धातुप्रदीपटीकायां। चौरादिकस्य तु। गोपितमिति। कथं। पणिनाम्ना हृच्चयोत्स्तु सर्थ एव आपत्र
स्यय इष्यत इति वृत्तिकृदुक्तत्वात् उच्यते। कैश्चित्साहचर्यं नाद्रियत इति रक्षितः। तथा च भट्टिः। नचापछेभेव णिजापणायां। माता
कथानाऽविज्ञतिन विडिति। छ्वोः शूडनुनासिके चेत्यत्र न्यासः उच्यते। तुदादावस्य पाठसामर्थ्यादायप्रत्ययो न विकल्पत इति के
चित्। अन्ये तु तुदादिपाठसामर्थ्यात्। आपप्रत्ययान्तादेव शप्रत्ययः। तेन विछायंती विछापती तुमो विकल्पत्वाऽद्विच्छपतीति रक्षितः
।कास्प्रत्यया। कथं। दरिद्रो नास्यनेकाजग्रहणं चुलुंपाद्यर्थमिति वचनात् आमाभावं। उच्यते आत औ णल इत्यत्र ओकारे कर्त्त
व्ये औकारकरणात् दरिद्रातेरार्द्धधातुके लोपो वक्तव्य इति वचनाद्विषयभावेनाकारलोपे दरिद्राविति यथा स्यादित्येवमर्थं। स
च दरिद्रातेरामो अनित्यत्व ज्ञापयति। कथं कासांचक्रे पुरी सौधैरिति भट्टिः। कास्प्रत्यय शब्दकुत्सायामित्यस्यात्र ग्रहणात्। न च कास २१

दीप्तादिविसर्गस्य ग्रहणं। चकाकाशोतीर्नैलौहित्येइतिप्रयोगात्। उच्यते। शब्दार्थस्यैवानेकार्थधातोः प्रकार्थत्वे रूपं युक्तं। इजादेश्च कथं
समाधेः सर्वमनेनेति भट्टिः। उच्यते। इंधिभवतिभ्यां चेति विज्ञापयति इजादिनिमित्तं आमनि सइतिन्यासः। कृञ्चानु। कथं तं पा
तयां प्रथमं मासं पपात पश्चात् इति रघुः। आम्प्रत्ययस्यैवेति न्यासे अवधारणात्। उच्यते पातशब्द उपपदे यातेर्यचि द्वितीयां तं पात
यां पातयांतमिसर्थः। आमेति आसगत्यादेस्तेप्राप्नुवानि सर्थः। यद्वा। आमुप्रत्ययांतस्य क्रियासाधनप्राधान्यात् तथा विधस्ये
व व्याप्तिः प्रथममिति तु क्रियाविशेषणं साधनप्रधानं। एवं संभावयां राघवमासवृक्षेरिसपिसिद्धं। सर्न्निशास्ति। कथं। स
मारं तमसा भीष्मइति भट्टिः। यतश्चकारेण परस्मैपदे षिसनुवृत्तेः। भाष्ये योगविभागो वैचित्र्यार्थ उक्तः। उच्यते। योगविभागास
रस्मैपदेषिति केचिन्न संबध्नंति उत्तरार्थस्त्वनुवर्त्तत एवेत्याकुरिति रक्षितः। रुदति। कथं। ककार इत्यादौ विभक्तिः। कारकप्र
त्ययस्य धातोरिसेवमविधानात्। कृत्वाभावात्। उच्यते। धात्वधिकारे विधानसामर्थ्यात् तु बहुलवचनाद्वा। वासरूपे। कथं। नि
त्यं पंचानीति। यतो वा सरूपेण तृत्यस्य स्यमियामिस मा च पक्षे भाव्यं। उच्यते। लिटः कानज्वेति वा वचनात्। लादेशेषु वासरू
पविधिर्नास्तीति ज्ञाप्यते। कथं कंडूनिर्वपनाद्ये तिशिरस इति कंड्वादियगंतादः प्रत्ययात्सकारेण क्विनो बाधा स्यात् अस्त्रि
यामिति वा सरूपविधेर्निषेधात्। उच्यते उपशब्द एवायं। बाहुलकाद्वा क्विलपीष्यत इति रक्षितः। कथं। मेघघतीति जीतः
क्तः इत्यनेन लटो बाधे क्तल्युट्तुमुन्— ल्यर्थेषु वासरूपविधिर्नास्तीति वचनात् उच्यते। तदधीते तद्वेद इति वचनात् ज्ञा
पकात् भूतक्तस्य तत्र ग्रहणात् वर्तमानक्तेन वासरूपविधिना लडपि भवति अपरं बहुलं लोकः। अचोयत्। कथं अ
नेन भाव्यमिति। संस्कृत उच्यते ओरावश्यक इति ण्यत्। पौर। कथं। तकांडेजाप्यस्याद्रम्यमर्षणमिति। उच्यते। बाहुल

कातण्यदिति पारायणं। गदमद। कथं। तेननतत्रभवेद्विनियम्यमिति हनुहशादिसूत्रे वृत्तिः। केवलाघत्। पश्चादिति शब्दे न स
मासः। उपसर्गप्रतिरूपको वा तिशब्दः। नियमे साधुर्नियमः। तत्र साधुर्यदन्यः। वदः सुपि। चकारेण यदपि समुच्चीयते कथं। क
र्त्तरि सर्वयोर्घूत्तम इति भट्टिः। कृत्यत्वात्। भवे विधानात् उच्यते। अर्शआदित्वादचि अथवा बाहुलकात् कर्त्तरि यदिति। क
थमनूद्यं। उपसर्गप्रतिरूपकत्वादनोः पतिस्तुशा। कथं कालेस्तुतिः स्तव्यपरापरोक्तिरिति चंडी। अनेन क्यपो भावात्। तोस्तव
महती सूर्थे दंडादिभ्यो यः स्तव्यं। अहलो। कथं। किं कृंमां समुपेस्युवसिवलात् निर्लक्ष्य लक्ष्याकृते वृक्षांतशठ मुंच शपथैः
किं धूर्त्त निर्वर्ध्यसे। श्विल्लाहृतवरात्रिजागरतया मेवया च विमां निर्मात्यो क्षितपुष्पदाम निकरे काष्ठघदायारातिः जा
गरतये समुक्तं। जागर्त्तेरकारो वेति अकारे ण्यति च जागरजागर्येति स्यात् उच्यते। पचाद्यचि भविष्यति। निर्वर्धेक्ष इ
त्यशब्द एव। निर्वध्नाति हस्यात्। अथवा निर्वर्ण्यत इति। यकाप्रथमपुरुषेण वा पाठः कर्त्तव्यः। ण्वुलतृचौ। कथं। अपक इति क
यस्योक्तिः। ण्वुला अधिष्ठापक इति स्यात् उच्यते। आतश्चोपसर्गे इति कः। अधिष्ठः ततः स्वार्थे कः। घस्य· कथं स्तपानि चम
रीबालभावाद्वाग्निः इति मेघः। दनो दावो वनाजलद्रुसमरः। ण प्रत्यये दांत इति स्यात् उच्यते। विभाषाग्रह इति विभाषापि
संबध्यते॥ ॥इति दुर्घटवृत्तौ प्रत्ययपादः॥ ॥कर्मण्यण्। कथं जाति स्मरो नूनमिमाबभूलामिति रघुः। उच्यते। पचाद्यचि भवि
ष्यति। कथं चलहंसनामहितः कृतवानिति भट्टिः। रमेरकर्मकत्वात् अणो अभावात् उच्यते। अंतर्भावितण्यर्थत्वात्। सक
र्मके भविष्यति। घञंतो वावैयधिकरण्ये बहुव्रीहिः। आतोऽनु। कथं· कर्षन्सवौ बालललतानदीक्ष्म इति रघुः। नद्यां स्नातो नदी
ष्ण इत्यधिकरणे उपपदे कः कर्मणी सम्प्रवृत्तेः उच्यते। मूलविभुजादित्वात् निरदीष्यां स्नातिः कौशल इति बलविधो वृत्तिकृ

तामुपिस्थइत्यत्रयोगविभागात्कप्रत्ययइत्युक्तं। हरतेरुः। कथं। तमोज्योतिलाहरतेरितियोगविभागेणनुवृत्तेः अधिकरणे
गिरेडः खंरसीतिवक्तव्यं। कथं। गिरिशं मुपचचारप्रत्यहं सामुकेशीति। तथा गिरीशो मडइति। उच्यते। गिरिरस्याश्रयत्वेनास्ती
तिलोमादिलाच्छः। अथवायजः कर्त्तरि कर्त्तव्ये अध्वर्युक्रतुरितिज्ञापकात् छांदसा अपि क्वचिद्भाषायां प्रयुज्यंतइति [redacted]
रक्षितः। चरेष्टः कथं सहचारी। अधिकरणइत्यनुवृत्तेः उच्यते चिंत्यमिति भाषावृत्तिः। टइतियोगविभागात्कर्त्तव्यः। भिक्षा
सेनाइति। चकारात्का। पुरोग्रतो। कथं पुरस्सरावामिति भाषावृत्तिः ऊ। पचादिपाठात्सिद्धिरिति केचित्। फलेग्रहिः। कथं
क्षांभरप्रश्व्यकोरा इति मुरारिः ऊ। चकारात्कुक्षिंभरिरिमुपलक्षणं। तथा च चांद्रं सूत्रं आत्मोदरकुक्षिष्विति अपे
क्लेश। कथं। भयापहः। तथा पटोलपत्रं वित्तघ्नं नाडीतस्य कफापहा। अन्येभ्योपि दृश्यते इति डः अमनुष्यकर्तृकेनास्ति निः
कृतिः। तथा ब्रह्मघ्नमपि चांडालं। तथा चूलभद्रः। लंबघ्नः। तथा शत्रुघ्नो राजा ऊ। मूलवि। मूलादिलात्कप्रत्ययइति भाषाप्र
वृत्तिः। पदसंस्काराद्वा। पदांतरसंनिधाने हि मनुष्यकर्तृकता। वाहुलकाद्वा टक। स्पृशोनुदा। कथं उत्तार्थतेजलान्यष्टो
लंकायाउदकस्पृशा उच्यते। औणादिकोत्र क्विप्प्रत्ययः। ऋत्विग्द। कथं नीचोवदतिनकुरुते स्पंचतीति निस्सिमिति
स्यात् उच्यते। क्विनिप्रत्ययेसति अनिदिताम् इति। अनुनासिकलोपः। अचप्रत्यन्चवपूर्वादिसूत्रा जितियोगविभागात्
अच्। अच्इकारलोपः। चविलिलिदीर्घत्वेनीचइति। सत्सूद्विष। कथं अवद्यमिति। वदः सुपि क्यप्चेति क्यप्। इहसुपीत्यनु
वृत्तौ उपसर्गग्रहणमन्यत्र सुप्ग्रहणेन नोपसर्गग्रहणज्ञापनार्थमिति वृत्तिः। ऊ। उपसर्गप्रतिरूपकोत्रार्थः। ऋत्येच।
कथं ऋत्व्यादेः। अहोननाइति सिद्धे ऋत्व्यग्रहणं वासरूपविधाननिवृत्त्यर्थमिति भाष्यं। ऊ। कृतविकृतशब्दे उपपदेकर्म

दुर्घ० वृ०
२३
23

ण्यण्। पृषोदरादित्वात् कृतविकृतशब्दस्य ऋ्यादेश इति कश्चित्। सुप्यजातौ। कथं स्वैरिणी। वक्तव्याभावात्। स्वेन ईरितुं शीलमस्या
इति णिनिः। उ। स्वादिरेरिणोर्वृद्धिर्वक्तव्या। ब्रह्मभ्रूणवृत्रे। कथं। न हि महाहिमहानि करोभवदिति माघः। तथा। कामहामहेश्व
रः। तथा मधुहेत्यादि ब्रह्मादिषु हंतेरेवेति नियमात्। उच्यते बहुलं छंदसीत्यतो बहुलग्रहणानुवृत्तेर्नियमव्यभिचारादिति र
क्षितः। न हि महेहेत्यादौ तु महि शब्दो मयं अनीयुमान् स्तूयेमि महाहिमहानि करोभवदित्यर्थः। अन्ये त्वाहुः। कथं। वृत्रस्य ह
न्तुः कुलिशमिति। अनेन क्विप् प्रसंगात्। उच्यते। कालसामान्यविवक्षायां लुङ् भविष्यति। एवं हि महेत्यादौ च अन्येष्वपि
द्रष्टव्यम् इति क्विप्। परोक्षे लिट्। कथं आभूत्तपो बुधसखः परंतप इति भट्टिः। अभूदभूमिः प्रतिपक्षजन्मनामिति माघः। उ
च्यते। यद्दसंस्कारे भूतसामान्यविवक्षायां लङ्। एवं च। कौशल्ययासौ विभुखेन रामः प्राक्केकयीशो भरतस्ततो भूत्
इत्यपि केकयशब्दादुपचारेण दुहितृवृत्तेर्ङीति केकयी। कथं। यावद्गिरः खे मरुतां चरंतीति कुमारः। परोक्षे लिट्। उ।
मस्याविशेषकरणापेक्षया यद्वर्तमानत्वं न ध्यायेत् लट्। वर्त्तमाने कथं। यदाह ध्यान्त्राप्रथमोद्दितं वच इति रघुः। आहो
ति वर्त्तमाने। उ। तिङ्तप्रतिरूपको पमाहेति शब्दः कालसामान्यवचनः। एवं च। समुत्कवतिपौलस्त्ये भूयोप्याह मह्येश्व
र इति। कैलासोद्धरणं। परिघोनुभुजानाह हसंती स्वागतं कपीदिति भट्टिः। कथाभिसंधानेन वर्त्तमानविवक्षा। यथा। अ
घकं सो निहन्यत इति। लेखस्तिस्रो बहस्यत्र नास्ति शब्दो मंविभक्तिप्रतिरूपकः कालसामान्यवाची। कथं न सास्यसि प्र
भुरिति कुमारः। वर्त्तमाने लट्। उच्यते। प्रत्येकं विनियुक्तालेऽर्थेयदा प्रत्येकमालनिविनियोगात्तदनंतरं। स्तानस्य भाव्यमा
नत्वात् लट् विवक्षावशात्। लटः शतृशानच्। कथं अविशाकंपचानस्य मुक्ताभाव्यं। उच्यते। आगमशास्त्रस्यानित्यत्वात्

मुक्। आनो ङि तः इति इयादेशो विनापि। गणकार्याणि नित्यत्वात् मुक्। आनो ऽप्यभावात् स्पृहि गृहि पाति। कथं ईर्ष्या
लुः। श्रद्धालुः लज्जालुः भक्तयः ईर्ष्यामालातीति मृगय्वादित्वात् कुः। शीतालुः इति शीतं न सहते इति नाप्तितः। वि
दि भिदि कथं कुलिशं भिदुरं पविरित्यमरः। तथा संसारबंधछिदुरान् द्विजातीन् इति घोषः। करोंद्र बंधछिदुरं भ
गेन्द्र भित्ति जांववती विजयः। छिदुरया वितमगल इति माघः। छिदेः कर्मकर्त्तरि। चायमिष्यत इति वृत्तावुक्तत्वात्
केवलेन स्यात्। उ। छिदि भिदेः कर्मकर्त्तरि चेति वामनोक्तत्वात्। अत्र कर्मकर्त्तरि चेति। चकारेण केवलेपापि कलिं
गः। सताशास। कथं। संतः प्रणयिवाक्यानि गृह्णन्ति अनसूयव इति मीमांसावार्तिकं। अत्र सूर्यशब्दः कंड्वादि यगंतः
। न सूर्याणामनुस्मरणं। उ। दुष्करणे मितद्वादिभ्य उपसंख्यानमिति डुः। विंदुरिच्छुः। कथं। तैलविंदवः। उ। गृह्णन्ति
हित्रापित्रा सिवासि हानि स्तो दिवाधिना निस्यश्रेतिचकारात्। विदि अवयवः अतो ऽप्रत्ययः। मतिबुद्धिः। कथं त्वया ज्ञा
तो मयार्चित इत्यादेरस्यापि संभवे वाधनं भवतीति वर्त्तमानक्तेन भूते क्तस्य वाधनात्। वर्त्तमानक्ते च क्तस्य च वर्त्तमान
इति षष्ठी स्यात्। उ। अपशब्द इति पदे भागवृत्तिः अस्ति च संभवो यद्युभयं स्यादिति भूतक्तेन। विभाषामिति न्यासः। मतिबुद्धि
पूजार्थेभ्यश्चेत्युक्त समुच्चयार्थो ऽकारः। शीलितो रक्षितः क्षांत आक्रुष्टो जुष्ट इत्यपि। तुष्ट श्रुत विभ्रत शब्द इतो अभिव्याहृ
त इत्यपि। कष्ट रुष्टो तथा कांतस्तथोभौ संयतोद्यतौ। कष्टं भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः। तथा सुप्तः शयितः अ
शितो लिप्त इत्येवमादीनां वर्त्तमाने वृत्तिः। वर्त्तमानक्तेन भूतस्य वाधनात् वर्त्तमानत्वमिष्यते तेन त्वया ज्ञातो मयाज्ञा
त इत्याद्यपि किं त्वमिति भागवृत्तिरिति भाषावृत्तिः। कथं। भूतक्तेन त्वयाशीलितो मयाज्ञात इति। बुद्ध्यर्थत्वात् वर्त्त

दुर्घ॰वृ॰ २४ २५

मानक्तस्य ग्रहणं स्यात्। तर्हि क्तस्य वर्त्तमान इति षष्ठी स्यात्। कालदृष्टा एवापशाद्या इति भागवृत्तिः। कथं कलहंसया
यमहितः कृतवानिति यमकं। महितइत्यनेन भूतक्तस्य बाधनात्। चिंत्यं। चिंता चात्र मतिबुद्धीत्यादिना वर्त्तमा
नकाले कालेभ्यः प्राप्तः क्तो विधीयते। यस्तु भूते विहितः स मत्यादिभ्यो भवत्येव। भूतस्तु बाध्यते। मत्यादिक्ते
न वर्त्तमानकाले भूतेपि। एतत्तु तक्रकौण्डिन्यन्यायेन मत्याद्यर्थेभ्यो भूते यः क्तः प्राप्तः स वर्त्तमानक्तेन बाधि
तव्यः। तेन वर्त्तमाने मत्यादिक्तेभ्यो भूतक्तो नास्ति। एतच्च क्तेन च पूजायामिति सूत्रे अनुन्यासकृतोक्तं विस्तरेण
। अथवा। तेन ज्ञात इति तृतीयासमासमर्थ्यात् तेन प्रोक्तमित्यधिकारात् प्रत्ययं कुर्वता आचार्येणैव ज्ञापितं। मत्यादेर्विहित
स्य क्तस्य योगे तृतीयासमासो भवत्येवेति तेनैतेन्यद्ज्ञापितमिति मद्विव्यक्ति। तस्मात्तेन ज्ञापितमिति निर्देशादेव अ
स्ति मत्यादिभ्यो भूतेपि क्त इति। अत्र प्रकरणे तत्र इति अत्र प्रकरणे तक्रकौण्डिन्यन्यायेन यदुक्तं। तदनुन्यासकारेण
भूषितमिति। कथं। इष्यते ज्ञायते मा इति भ्य अनेन वर्त्तमानक्ते लटो बाधकेन भवितव्यं। न चात्र वासरूपविधिः
। क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति वचनात् उच्यते। ल्युट्तुमुन् इत्यत्र लुप्तमाहच पाठो वेक्त
स्यैव ग्रहणं न वर्त्तमानस्तु क्तस्य तत अत्र वासरूपविधेरमतिबोधात् इचि — प्रभृतिभ्यो युक्त एव पक्षे वर्त्तमाने
लट्। एवं क्तल्युटा वा शक्यत इति किराते श्रियः कुरूणामिति सूत्र विदितो ज्ञाने ज्ञातस्य वेशोरास्ती। तिरीतेः। एतत्कथं
। भावता क्तेन भाव्यं संबोधनं घटते अत्र धातुसंबंधे प्रत्यया इति विधते यथा अग्निष्टोमयाज्यस्य पुत्रो जनिता अय
था कालोक्ता प्रत्ययाः साधवो भवन्ति। न्यग्भूतवर्त्तमानकालशक्तिरिति क्रियासमवाच्यवानिति भूतवृत्ति क्रिय २४

यायोगात् त्वा· विभूतकालवृत्तिर्भवति ॥ ॥ इति शारणदेवदुर्घटवृत्तौ कर्मविपादः ॥ ॥ उणादयो बहुलं भावे। कथं। मंदा कि
न्याः पयः शोषमिति कुमारः। तथाश्रोबाण्यहो बीदितिर्भाद्दः। दतिः शोषेति कीर्तिते तिशाश्वतः शोषं समानमिति। मृज
जयंताः उसीति भाष्यात् घञेचक्रदोरविसादिकारिव्यक्तत्राचलच्यते। प्रापिकमेतदिति ग्रहदसादौ व्यासः। भावे
घञ्प्रतिपुंस्त्वमुक्तं। कर्मादिघञं तस्य नानालिंगतेति वल्लभः। मृजनधाः शोषस्ये सत्ररक्षितेनोक्तं। शोषशब्दस्यावि
ष्टलिंगत्वादिति। तस्यादिशिष्टार्थे द्विलिंगता व्यभिचारादिहलोधित्वात् सदं। भगामिति सिध्यतीति। कथं। सर्वपददृक्षि
पदेप्रविष्टा तिक्रीवत्वात् पदद्रुव उ॥ तैलेच संप्रविष्टं इतेचमां सेवजंज प्रविष्टं। भव्यामुनी चामुना प्रविष्ट सर्वपदंह
त्तिपदेप्रविष्टमिति पाठः कर्त्तव्यः। परिणाहव्यायां। कथं कुंजकुणादिसूत्रे सप्तदशाप्रसया इति उ। पदसंस्कारे। उप
सर्गे। कथं भीषणाशवगृहदमिति उच्यते। भाषार्थत्वात् इतुरधुभाषार्थाः। इति चुरादिपाठात् णिचि एरवा। श्रेणी
षु। कथं प्रादुर्भाव इति। प्रआङ्· दुरित्युपसर्गसमुदायस्याप्युपसत्वादनेन घञानभाव्यं। उपसर्गप्रादुर्भावस्तिर्य
ग चारदत्तत्रोपसर्गग्रहणं कृत्वा प्रयत्नोदुर्ग्रहणं करोतीति तज्ञापयति। नात्रोपसर्गकार्यमिति। कथं प्रभावः। प्रकृष्टो भावः
प्रभाव इति वृत्तिः। कथं नमो नीतिः उ। संज्ञापूर्वकस्य विधेरनित्यत्वात् वध्यभावात्। उदित्र्यति। कथं। पततांताः स
मुच्छ्र्या इति उच्यते। विभाषाङि रुप्लुवोरिसतस्तत्र विभाषाग्रहणानुवृत्तेः। एरव। कथं। परिमळः। कस्तूरिकास्त्रध
त्रुरिति। परजंतोह्यमं क्रियावचनो गुणवचनो वा। तत्र द्रव्यसामानाधिकरण्यमयुक्तं उ। असाधुरेव। योपरिमलः कस्तू
रिकास्त्रं धत्तुरिति पाठः· असंघार्शाघाचिन्त्रीलं स्यात्। कथं भयमनंभीतिरिति मित्रार्थाभिसत्र व्यासः। कथं। भीतंशिशुना

वर्बणंष्टष्टमिति। अजविधौ भवादिग्रहणं नपुंसकक्तादिनिवृत्त्यर्थमिति वक्ष्यमाणात्। उक्तादिनिवृत्त्यर्थमिति प्राप्तिमात्रो ज्ञाव
नं। तेन वासरूपविधिना क्ताद्यपि भवति। न च क्त ल्युट् तुमुन् खलर्थेषु वासरूपविधिर्नास्तीति वा क्तादीनां पचादि
से तस्य व्यापारा भावादिति भीत्रार्थानामिति रक्षितः। एवं च व्यवस्थितविभाषा साध्यत्वात् अस्य वाक्यस्य ज्ञापकत्वा
त्र भयभीतभीतिभीरिति वक्तव्यमिति। तथा वृषभो वर्णादिति भाष्यं। कृदो रप्। कथं। अतिशयो भर इत्यभरः। भजो अ
दीर्घितत्वात् उच्यते। कथं भूयावतारः प्रक्रिया उच्यते करणाधिकरणयोश्चेत् स्त्रोर्घञिति कथमवतारो नद्याः। उ।
बाहुलकात् घञिति वृत्तिः। कथं। रुद्रो रुदंतमुष्टाच्छप्रसारं निमेते इति माघः। सर्वे रदीर्घितत्वात्। उ। बहुलवचनादिति। घ
ञि संज्ञापूर्वकत्वात्। वृद्ध्यभावे गुण इत्यन्यः ग्रहश्च इति कथं। कंठेस्वयं ग्राहनिषक्तबाहुरिति कुमारः। ग्राहं गतास्तत्र
कथंचिदन्येऽइति। उ। बाहुलकात्। घञभावः। ग्रह एव ग्राहः। प्रज्ञादित्वादणि। कथं। परिवारशतैर्वृत इति। वृइति सामान्य
ग्रहणात्। उच्यते। परिवारयतीति परिवारः। कथं तर्हि परिवारोपवर्यस्तमतां तथापि सामिति भट्टिः। घञि सतिउपस
र्गस्यान्यमनुष्ये बहुलमिति दीर्घत्वात्। उच्यते। बहुलकादिति वृद्धिः बाहुलकाद्वा घञि न दीर्घः। कथं क्रियते सारसंग्रहः
। हलश्चेति करणाधिकरणघञः अपोबाधनात् उच्यते। करणाधिकरणयोश्चेति ल्युटा अबाधितः सोऽश्चेति घञा पिहल
। ततश्च वासरूपविधिना यथा ल्युट् तथा तद्विषये वासरूपविधिना अजपि भवति। क्त ल्युट् तुमुन खलर्थेषु वास
रूपविधिर्नास्तीति तत्र भाव ल्युट् गृहीतस्तन्मते बाहुलकाद्दच्। या च्या मोघा वरमधिगुणे नाधमे लब्धकामा। घञन्तं
ताः पुंसीति पुंस्त्वात्। उ। प्रायिकत्वमस्योक्तमेव कर्मणि वा अप्। अव्ययं वा। तदुक्तं द्विवाकल्पितजातमात्रो वंशे षेपुन

वेंक्तिषु। मतांगिष्टेभवे क्लीबं अन्ये त्वाहुः स्त्वद्व्ययमिति। व्यधजपो। कथं कर्णजापः। शूद्रस्य मंत्रजापं प्रत्यनधिकारात् इ
ति न्यासः। भाव्यर्थाल्लिंगतु बधुर्जपभाषार्था इति चुरादिपाठा ण्यिजंतत्वात्। घञ् मोरन्यतरः। मदोनुपसर्गे। कथं। माद्यो म
द्रइत्यमरः। उ। सधमाद इत्यश्वे तिनिर्देशात्। स्वनहसोर्वेति वाग्रहणानुवृत्तेर्वा। स्थित विभाषा विज्ञानादिति सधमाद्यो
रित्यत्र न्यासः। संघोद्धौ। कथं। द्यमित्वापरिसंघातानितिभट्टिः। उ। केवलपूर्वधातुः साधनेन युज्यत इति दर्शने। वंतयतेर्वा
उपसर्गे घोः। कथं विश्व सद्रुधिरित्यमरः। भाद्रअकर्त्तरि च कारके इत्यनुवृत्तेः कर्त्रसंभवात् न च कर्त्तुः करण। विवक्षायां
भविष्यति ल्युटा बाधितत्वात् न च वासरूपविधिः। क्तल्युट्तुमुन् खलर्थेषु वासरूपविधिर्नास्तीति समर्थसूत्रे रक्षि
तः। उ। बहुलवचनात् कर्त्तरि किः। स्त्रियां ग्लाज्याहानि। कथं। ग्लानिः। उ। बाहुलकात्। पुरुषोत्तमदेवस्तु ग्लाज्याहाभ्य
इत्यत्र ग्लेधातुमपि पपठति। जुति। पूति। कथं। कीर्त्तना। उच्यते। बाहुलकात् सुवा। व्रजयजो। कथं। इष्टिः। उ। बाहुलका
द्वासरूपविधिना आस्त्रियामिति अल्पार्थे नञा। संज्ञा कथं। भार्या। उ। स्त्रभावाद्भावे क्यप्। तेन भजो संज्ञायामिति क
र्मणि क्यप् त्वसः। संज्ञायां तु एव तिभार्येति वृत्तिः। कथं। भृतिर्वेतनं। उ। कर्मणि भृताविति निर्देशात्। कथं समासं इति
संसद इत्यमरः। उ। बाहुलकादिणः। क्तिन्। इट्। किट्। गतावित्यत्र इङ्गतावित्यतो वा। कथं मतिः। कथं आश्वति। उ।
मतिबुद्धीति रजः कृष्या सुतीति निर्देशात् अः प्रत्ययात्। कथं। कंडतिर्वपनादपैति शिरसः इत्यत्र दान्तः। कंड्वादियगं
तादनेनाकार प्रसंगात्। उ। द्विविधाः कंड्वादयो धातवः। प्रातिपदिकानि च। तत्र प्रातिपदिकस्य कंडूतिशब्देन प्रतीयते
दीप्तो वृद्धो वा वृत्तेन कंड्वाडतिरिति षष्ठी समासेन साधुः। पद्येवं कथं न परांते सत्र क्तिनि प्रत्यये वलिलोपस्य उदाहरणं

।उच्यते। न्यासकृता स्त्रियां क्तिन्निति मृदुक्तं तत्कृत्सल्युटो बलमिति स्त्रीकृता। तथा च पशब्द एवायं। बहुलवचनाद्वा क्ति
न्निति रक्षितः। भाषावृत्तौ तु क्तिजंतेन कथं प्रथमा उच्यते। क्तिन्नावादिभ्य इति क्तिनि। न चैवं क्तिबाधितत्वाद् प्रसन्माद्दिल
प्रसयो न स्यात्। वनेति। स्यागापापचो भावे। क्तिन्नास्संतापबाधकः। यथा व्यवस्थामामसं ज्ञायामिति निर्देशात् शोभा अगुरु
मत्वात्। उ। शुभ शुंभ शोभार्थ इति निर्देशात्। चकारस्यानुक्तसमुच्चयार्थत्वाद्वा कः। ततो न्यासस्त्रथो युजिति युधा भावे।
उ। आर्द्धधातुक इति विषयीडनाभयाविति माघः। बिद्भिदादि। कथं उपलब्धेः। लभेः बित्वात् अङाभावे। उ। रभेः क्ति
न्निरलयोरेकत्वस्मरणात्। लभे रावादित्वाद्वा क्तिन्। केचित्तु नः डुलभष् प्राप्तौ। विप्र बितमेव पठंति। तन्मतेनाव्याहत एव
क्तिन्। बाहुल्यात् क्तिन्निति भाषावृत्तिः। कथं क्षांतिः। उ। दैवादिकाद्दिवितः कथं। सपक्षः पराभिदकर इति माघः विदा
रणार्थे अन्यत्र भित्तिः। भिधाविधारण इतीक्ष्णः। उ। प्रापिकं तदुपाधिवचनं। धारा प्रपतने। धृतिरन्ये सस्य प्रापिकत्वा
त्। बहुलवचनाद्वा क्तिन्सपक्षः पराभेदन इति पठंति कथं मृजान्वयाः स्नेहतिवाश्रयंतीति भट्टिः। उ। मिदादेराकृतिगणत्वा
त्। चेतिंपूतिकथिकुंथि विवर्जैसेति चकाराद्वा। एवं स्पृह्। भुरात्कृजेति। पक्षे। चुचेति तु ऋदिपाठादा कृजेति। कृजार्थानामिति
निर्देशात्। मृषि रिति भजू शोवालंकरणयो रिति चौरादिकात् क्तिन्। आतश्चोपसर्गे। कथं। प्रमितो प्रमे समरः। था
श्रीनिर्मितं प्राप्य घुणक्षते के वर्णोपमावाच्यमलं ममार्जेति माघः। उच्यते। बाहुलकात् क्तिन्निति भाष्यावृत्तिः। न्यास
भयो। कथं दृष्टावेला। उच्यते। अतुलोपमाभ्यामिति निर्देशात्। कथं पाचयतेः पाक्तिः। उ। बाहुल्यादिति रोगाख्यायां प समा१
र्णाकारः। कथं एवकारः। हुंकारेणैवमिति वेणी समुदायात्कार प्रत्ययः। उ। बाहुलकात्। घञंतेन बाँसः रादिकः। क २६

थं। इति करणो विवक्षार्थ इति तत्र तेनेदमिति सरूपसूत्र वृत्तिः। इतिकरणो हेतावि सेकाचोद्व इत्यत्र न्यासः। उ। क्रिय
त इति करणशब्दः। कृत्यल्युटो बहुलमिति ल्युट्। कथं। सतेकरोतु कल्याणं यस्मै ते पंच भूषणा। इति। उ। क्रुधमंडार्थेभ्य
श्चेति युविपुंल्लिंगोयं। ईषद्दुःसुषु कृच्छ्रा। कथं दुध्यादिति। उ। केवलात् ण्यति। आतो युच्। कथं। दुर्विज्ञेकमपि प्युद्ध
र्मश्रद्ध्यातिउदाराधीति प्रयोगमप्युः वासरूपविधिर्नास्ती ति कल्युट् तुमुन् खलर्थे निवचनात्। उ। क्रियातिपत्तेर वि
वक्षितत्वात्। विवक्षा हि शब्दव्युत्पत्तेः। प्रधानं कारणमित्युक्तं। प्रेषातिसर्गप्राप्तकालेषु कृत्याश्च। कथं। इदं करिष्यसि। इदानीमेवेति। प्रे
षणस्य व्यक्तत्वात्। कृत्य लोट् भ्यां भवितव्यं। सर्वकालापवादत्वात्। उ। पदसंस्कारे साध्य। एवं श्योगमिष्यसीत्या
दिरपि साधुः। माङि लुङ्। कथं। मा भवतु तस्याः पापमिति। उच्यते। माशब्दे अङिति भविष्यति। कथं मा भवत्यामी
ति रूपावतारः। उपपदसंस्कारे॥ ॥ इति दुर्घटवृत्तौ लपादः॥ ॥ धातुसंबंधे प्रत्ययाः। समानकर्तृका। कथं अवज्ञाना
मां यस्मादतस्तेन भविष्यति। मत्वमस्तु ति मनाराध्य प्रजेतिलापशापमेतिरघुः। तथा कूपोदकमुखदृष्ट्वा सद्यस्तुष्य
ति केशवः। स्वात्वा मुखं भवति। मासेन भुक्त्वा तुष्टिः स्यात्। भिन्नकर्तृत्वात्। उ। स्थिते सत्ये सध्याहार्यमिति भाषा
वृत्तिः। यद्वा अनाराध्येति तु हेतुमणिजन्तात्क्त्वा। प्रजैव प्रयोजककर्त्री। कथं। कथं केशेषु केशीषु गृहीत्वा इदं युद्धं प्रवृ
त्तं। उ। वृत्तेरन्तर्भावितण्यर्थत्वात्। युद्धमिस भिहितं कर्मेति समानकर्तृकतेति रक्षितः। कथं। कर्णेहत्य पपठ। वि
वतीतिउदरं पूरयित्वा भुंक्ते। समानकालत्वात्। उ। कष्टो हत्येत्यत्राभिलाषनिवर्त्तनानन्तरं स्नानं तदपेक्षया
पूर्वकालत्वादिति कर्णेमनसि इत्यत्र रक्षितः। चक्षुषी निमील्य हसतीत्या साधुपसंख्यानादिति भाषावृत्तिः। कथं।

कृत्वा विप्रकुलं व्रजतीति। नपुंसकह्रस्वत्वप्रसंगात्।उ।तुमर्थेऽअस्य विधानात् कर्त्तुः। क्लीवत्वस्य गुणत्वादिति रक्षितः। य
थैवं। समासेऽनञ्पूर्वे इत्यत्र न्यासे कर्त्तरि क्त्वाप्रत्ययउक्तः।उ। परमकत्वेति समानाधिकरणनिर्देशनिपरंतदिति रक्षि
तः। कथं पूर्वापरौ तोयनिधीवगाह्य स्थित इति। अपूर्वकालत्वात्।उ। स्थित इत्यर्थः। ऊर्ध्वं स्थित इति पुरुषोत्तमदेवः
अन्यथैवं। कथं अन्यथाकृत्वागतः। तथा कथंकृत्वेति अनेन णमुलोऽभावात्।उ। कथंकृत्वाचोदितं। अन्यथा कृत्वा परि
हृतमिति भाष्यात्। वाशरूपविधिना वास्म्यधिकारेण वाशरूपविधिः। प्रापिक इति रक्षितः। कृष्यादिषु यथा। विक
थं अपुष्पलक्ष्यमोषमिति भट्टिः। यतोऽनुप्रयोगः। पश्चात्प्रयोगः। इह तु पूर्वप्रयोगः।उ। अनुशब्दोऽयं समीपवाची। अनुप
तत्समयेतिवत्। कर्त्तरि क्तः। कथं मुखे को वा न पंडितः। स्यात्स्थ इत्यत्रार्थः।उ। सुपि स्थ इत्यत्र सुपीति योगविभागात्कः॥
अभ्यक्षं वर्त्तत इतिवत्। मुखस्थे को चेति पाठः। तयोरेव कृत्ता। कथं। वफलानामाशित इति पूरणादिसूत्रे वृत्तिः। अश्नातेः स
कर्मकत्वात्कर्त्तरि क्तो न स्यात्।उ। आशितः। कर्त्ते इत्यत्र स्वनसत्रे निपातनः। कर्त्तरि क्त इति भाष्यं। अविवक्षितकर्मत्वा
दकर्मत्वे कर्त्तरि क्तः।आउ। पूर्वादीर्घ इति वृत्तिः। एवं गुरौ। भुक्त इत्यादे गुरौः। कर्मणो अधिकरणत्वेन विवक्षितत्वात्
अकर्मत्वे कर्त्तरि क्तः। भक्तियोगाद्वा। अर्श आद्यजंतः। एवं भुक्ता ब्राह्मणाः। वनाम पीतप्रतिबद्धवत्साभिरुज्ज
ताः पीतप्रतिबद्धे इत्यत्र पिबतिर्वांतभावितण्यर्थः। पायित इत्यर्थः। कथं। भवितव्यं प्रियसंगमं च पुरि इति कुमारः।
कर्मणोऽभावात्।उ। भूप्राप्ताविति स्वस्य आधृषाद्वेति अण्यंतस्य रूपं। कथं। शमनीयं शाप्येति।उ। कृत्यल्युटो बा
कुलमिति अधिकरणे। कथं सोमनाथ बंधुमहंनतो जगदीश्वरमिति। हृष्यश्रित इति कर्त्तरि क्तः।उ। नमनं हिगति

भेद इति वैशेषिकाः। यदाहुः। गमनाकुंचनप्रसारणोत्क्षेपणावक्षेपणानि कर्माणि इत्युक्तम्। उत्क्षेपणावक्षेपणे गतिविशेषौ। सेवा पृथग्गतिरेवाश्रयणं च प्राप्तिः
गतिरेवेति गत्यर्थाकर्मकेत्यादिना क्तः। टित आत्मने। कथं। कृत्तोरी कर्त्तारः इति न टेरेत्वं। उ। कृतटेरेत्वस्यादेशो जातो लक्षणाभा
वात्। यद्वा। थासः सेः इत्यत्र सकारादेशो कर्त्तव्ये एकारांतादेशोऽस्तापयति। लादेशादेशानां न टेरेत्वं इति। शेरते। एवं तत्र स्त्र
तुलादेशस्यैकदेशादेश इति टेरेत्वं। एत्वे कृते वा अंतादेशः। एरुः। कथं। लोटि जयतीति प्रक्रिया अनभिधानादिति केचि
त्। न भाषायां वृत्त्यादौ चानुक्तत्वात्। जयतु जयतु भद्रा इति तत्संध्यारे दर्शनात्। नच प्राकृतानुशासनमस्ति। किं च तुः शब्दसा
त्विकः। तातङ् च दृश्यते। उत। सर्वमांगलोन्नतिनिः शेषचेष्टितः। स्थापगम्यनयको विजयतां द्राक्शोभमहाचरुः। नित्सा।
कथं। यातः। किं चिरध्याय इति कुटनीमतं। लोटो लङ्वदिस्यतिदेशेन। नित्यं ङितः इति सलोपप्रसंगात्। उ। लोटो लङ्
दित्यनुवृत्तौ। विदो लटो वेति सलो वा ग्रहणानुवृत्तेः। लादित्यावृत्त्यर्थं मवस्थितविभाषाश्रयत्वादत्रापि न सलोपः।
सलोपे च पादांते षु वकुलमिति गुरुत्वे त्रिमात्रता। विरध्वाम महा इति वा पाठः कर्त्तव्यः। यासुट् परं। कथं जिघांसत्वं जि
घांसीयादिति जिघांस धातोर्लिङि तिपि पासुटि जिघांस्यादिति स्यात्। उच्यते। जिघांसी सावश्यके णिनिः। इयादिति
इण् धातोर्लिङि॥ ॥इति शरणदेवकृदुर्घटवृत्तौ तृतीयोध्यायः॥ ॥ङ्याप्प्रातिपदिकात्। अजाघतः। कथं। लंब्रास्तणीति
। लादेशो दलोपे च टाप् प्रसंगात्। अलिंगे युष्मदस्मदी इति भाष्यात्। कथं तर्हि युष्मदस्मत्तिङ् यमयमिति। लिंगादिसंग्र
हे त्रिलिंगकांडे शेषे अमरः। उ। त्रिलिंगसामान्यपरं हि तत्। अथवा। शेषे लोप इति टिलोपो व्याख्येयः। तदुक्तं टिलोप
स्टाबभावार्थः कर्त्तव्य इति। भ्यसो भ्यमिति। अभ्यमादेशः कार्यः। कथं। वृत्तो हरावि सत्र स्यादेशो न टाप्। संनियोगविधानादि

तिचेतन। सत्यवामविषापयो पिवसंतियोगाभावात्। उ। अत्र घेरिति तपरनिर्देशो लक्षणं। तरामात्तदीर्घनिवृत्त्यर्थः।
तेनटावपिन भविष्यतीतिन्यासः। गर्भवघवादमेति ज्ञापकतुल्यत्वात् असर्वविषयत्वात् भाष्यकारस्तु सन्निपातला
क्षणपरिभाषायामाह। कासेसत्र सन्निपातलक्षणपरिभाषानाश्रीयते। नयासयोरिति निर्देशात्। किं नोक्तत्वादि
ति नाच्यते। भाषाशब्देन युरोश्च हस्वलं सकारप्रत्ययेनोक्तत्वात्। यपोआभावप्रसंगात्। ऋन्नेभ्यो ङीप्। कथं। राज
कुमारीति। उ। भागवृत्तिकृत्प्रशब्दं स्वस्रादौ पठितवान्। तेन न षट्स्वस्रादिभ्य इति ङीपो निषेधः। कथं तर्हि नप्त्री
यो त्रीसुता मजे समरः। उ। ये स्वस्रादौ न पठंति तन्मतेन। उगितश्च। कथं करिष्यमाणा पचमाना ब्राह्मणी। उ। उगि
ल्लक्षणष्टिल्लक्षणश्च ङीष्प्राप्नोति। उपासुटो ङि: खेन ज्ञापितं लकाराश्रयं चानुबंधाश्रयं च कार्यं लादेशे न स्त्रीक्रि
यते। टिड्ढाणञ्। कथं। सहचरी सशंकं पुरूषायुषमिति भट्टिः। अधिकरणोपपदाभावाश्चरेष्टः इत्यस्याभावे प
चाद्यचि। उ। भिक्षासेनादायेषु चेति चकारस्यानुक्तसमुच्चयार्थत्वाट्टप्रत्यय इति जयमंगला। गौरादिपाठादिसन्त्व
मः कथं मधुपीभ्रमरीगायोष्ठगि सत्र सुरासीध्वोः पिबतेरिति नियमात्। टको अभावे मूलविभुजादित्वात्कः। त
तश्च टाप्प्रसंगात्। अजातेरस्त्री विषयत्वादिति ङीपि कथं। लक्ष्मीस्त्वमीश्वरीति चंडी। स्वेषभासइति वरचिदा
पाभासं। तथा च भारविः। विन्यस्तमंगलमहौषधिरीश्वराणं इति। उ। अश्नोतेराशुकर्मणि चरट् इति ह्रस्वोपधायाइ
त्यनुवृत्तेरी लेङीपि। कथं लवणा यवागूः। लवणाल्लुगिति। अणो लुकि ङीप्स्यात्। उ। अत इत्यनुवृत्तस्य टिड्ढादि। भि
विशेषणात् वर्णाश्रयात् वर्णाश्रयविधौ प्रत्ययलक्षणं नास्तीति ङीब्न भवः। एवं श्रवणा रात्रिरिति श्रवणे। ति। श्रव २८

णषाखेति सूत्रनिर्देशादपि। कथं। स्त्रियइति कुञो हेतुता छील्ये ति ट विधानात्।उ। मूलविभुजादित्वात् कः। कथं। तामेक्षं
तक्ष्णं सभ्यादुःशा सनपुरःसरा भित्ति भारविः। पुरोऽग्रतोऽग्रेषु सर्त्तेरिति ट विधानात् उच्यते। पचाद्यच। कार्यः पदस्सं
स्कारे। पिशैलादि। कथं। त्रयाक्षमा। यथा स्तनंधमी सत्र धेटः शित्वात् ङीप्। तथा बिलात्त्र ङीष् स्यात्।उ। बिलस्याङ्
विधेश्चरितार्थत्वात्। समुदायार्थं तानुपपत्तेः। कौरव्यमांडू। कथं। मघ। स्त्री कूपमांडूकि स्तथैवावति कस्मात् इति भट्टिः
अत्र कौरव्यमाहच व्यादपत्याणतो मांडूकः मांडूकायनी तियुज्यते।उ। मांडूकायनी तियुज्यते।उ। मांडूकस्य भार्ये
ति तस्येदमर्थे इञि जयमंगलायां। लुट्कृ मंडूकादिति चकारादिञ् कः। वयसि प्रथमे। कथं। बालामबालेंदुमुखी
वभाषे इति रघुः।उ। अजादिपाठात्। एवं वत्सेति कन्येति। कन्यायाः कनीन चेति निर्देशात्। वोतो गुण। कथं अनन्यगु
र्वी स्तवकेन केवल इति माघः। अनने। ङीपि सघवेति निर्देशात्। वोतो गुण। कथं। अनन्यगुर्वी स्तवकेन केवल इ
मासेचनघृतश्चेति कपस्यात्।उच्यते। ङीपो भावपक्षे अनन्यगुर्वी इति पाठः। समासांता निसत्वाद्वा। यद्वा। भो
अनन्य। विष्णो संबोधने सर्वमिदं जनार्दन इति दर्शनात्। बाह्वादिभ्यश्च। कृदिकारादक्तिनः सर्वतो क्तिन्नर्थादित्ये
के। कथं कुट्टनीमते पंचवृत्सो वेश्याः अक्तिन इति निषेधात्।उ। वृत्ते रिष्कष्यादिभ्य इति इयंतात्। यद्वा। मंचवृत्सौ इ
तिपाठः। विसर्गश्रवणार्थं इंद्रवरुणभव। कथं। ब्रह्माणी।उ। ब्रह्माणमानितीति। आनितेः। कर्मण्यणि। एवराजकुला
नी। ब्राह्मी तु भारती भाषे त्यमरः। तदस्येदमर्थे अणि। ब्राह्मीजातावित लोपः कथं भिक्षुणी उ भिक्षां भिक्षुश्च तप
स्विप्राप्नोतीति केपि कृदिकारादक्तिन इति ङीष्। क्वादल्पाख्या। कथं। अक्षारलवणलिप्ता जिह्वा। उच्यते। लवणशब्देना

दु०घ०वृ०
२९
29

ल्पसस्सोऽकल्पादितिरक्षितः। स्वांगाच्चोप। कथं। सुभगा। उ। नक्रोडादिबह्वचइति। निषेधात्। नक्रोडादि। कथं
।कल्याणक्रोडी। उ। क्रोडाशब्दोऽत्रोपात्तइति न्यासकृत्। तेनक्रोडशब्दात्कल्याणक्रोडीतिरक्षितः। उक्तं तः।
कथं। सपदि याविधवावरभीरवइतिमाघः। तथा विशेषास्त्वं गच्चाभीरुः कामिनीवामलोचनाइत्यमरः। उ। इतो
मनुष्यजातेरितिवृत्तौ मनुष्यत्वविवक्षायां नाङ्। ऊङुत्तरपदा। कथं। पीवरोरूपी वनीचवार्हिण इति कुमारः। औप
म्याभावात् ऊङो अप्रवृत्तेः। उ। संज्ञापूर्वको। वैधिरनित्य इति गुणाभावात् अप्राणिजातेश्चारज्वादीनामिति सू
र्वशाद्याप्तू जिवाक्षुश्रीहि।। द्विगोर्लुगन। कथं। पांचकपालो भागः। पांचकपालमयमिदं। उ। विभाषानुवृत्तेर्व्यव
स्थितविभाषात्वात्। चातुरर्थिकः। त्रैवर्णिक इत्यध्यात्मादिपाठसामर्थ्यात्। चातुरर्थिक इति स्यादिपाठव
लादितिरक्षितः। चतुर्वैद्य इति द्विगुत्वात्। चतुर्विधा विद्या इति विवक्षितः। चतस्र एव विद्याः चातुर्वैद्य इ
ति। अनुशातिकादित्वात्। प्राग्दीव्यतीयत्वाच्च। अत इञ्। कथं वसुदेवस्यापत्यं वासुदेवः। उ। ऋष्यन्ध
कवृष्णित्वात्। कथं तर्हि शौरिः श्रीपतिः। उ। बाह्वादित्वादिञ्। क्वचिदपवादविषयेऽप्युत्सर्गप्रवृत्तेर्वा। एवं सावर्णि इ
ति। स्त्रीभ्यो ढक्। कथं। शातेयं कुरु सौमित्रे भयात्त्रायस्व राघव इति भट्टिः। अबाह्वादित्वादिञ्। कथं। शापतोभाने
ति। उ। शिवाद्यणि घ्य च। कथं। पार्थो धनंजयः। उ। पृथाशब्दात् शिवाद्यण्। कौशल्यकात्। कौशलशब्दात्स्तू
लप्रकृतेरपि से किं जीप्रत्ययस्य लियोगे न पुङागम इति वृत्तिः। कथं तर्हि वामेऽपलभ्यां पश्यतः कौशल्यापतिः वर्जि
तामिति भट्टिः। नह्यसौ कौशलशापसमिति रक्षितः। उ। इतो मनुष्यजातेरिति ङीषंतात्। कौशल्यापमनीशब्दात्।।ना २९

मयुवापसेटक्। तस्यापत्यं बाह्मणगोत्रमात्रात् युवप्रत्ययस्योपसंख्यानमिति लुकि। लुक्तद्धितलुकि इति स्त्रीप्रत्ययनिवृत्तौ ज
नपदशब्दात् कथं। केकयपुत्रः। तं वतब कनर्थमूचुस्तथान्येन न तस्य मायामिति भट्टिः। तथा प्राक्केकयीतो भरतस्त
तोऽभूदिति। केकयस्यापत्यं स्त्री इति अनेनाञि अतश्चेति लुकोऽनपत्यमर्गादीति निषेधे केकयमित्रयुप्रलया
नामिती यादेशे आदिवृद्धौ इति केकेयीति स्यात्। तथाच रघुः। केकेयि कामाः फलितास्तवेति। उ। केकयशब्दो मू
लप्रकृतिरेवोपचारात्। स्यमपसे वर्त्तसन्नः। शार्ङ्गरवादिषु पठ्यते। तेन डीशब्दे कोशला। पांडोर्जनपदात् क्ष
त्रियशब्दात् यण् वक्तव्य इति यणि। कथं पांडवाः। उ। तस्येदमर्थे अणि॥ ॥इति दुर्घटवृत्तौ ङ्याप्पादः॥ ॥तेन
रक्तं रागात्। लुबविशे। कथं अधरात्रौ पुष्यइति यो बीरात्रिरिसेतद्विशेषविहितत्वात् लुपान भवितव्यं। उ। अं
तरंगत्वात् विशेषणसमानाधिकरण्ये अविशेष इति नानिषेध इति रक्षितः। आग्रहायण्य। कथं आग्रहाय
णो मासः। आग्रहायणी पौर्णमासी। सास्मिन्निति सम्बुद्धौ। निसंउ को भावात्। आग्रहायण्या अयमिति तस्ये द
मप्येअण सर्वनिपातव्यभिचारात्। उ। को अनिसवादौ लसर्गिको अण सास्य देवता। कथं। ऋद्धं हि राज्यं पदमैंद्रमा
हुरिति रघुः। यावता देवता संप्रदानविषये अणिष्यते। उ। तस्येदमर्थे भविष्यति। सोमाद्यण्। कथं। अपेतयुद्धा
भिनिवेशसौम्यइति माघः। सास्यदेवता इत्यनुवृत्तेः। उ। सोमदेवता हित प्रिहेतुः अतः सुकुमारोपित प्रिहेतुत्वा
त्। उपचारात् सौम्य इत्युच्यते तथाच सौम्यः स्यात् सुकुमारे सोमदेवइत्यमरः। संग्रामे प्रयोजनयोजनयोद्धभ्यः। क
थं भारतो ग्रंथः। संग्रामे विधानात्। उ। भरतानधिकृत्य कृतो ग्रंथ इत्यण्। ग्रंथानां भूयस्त्वेन महाभारतः। कृतं

श्यादिवत्सूत्रं। कथं। चातुर्विद्या। उक्थादित्वात्। कौ हिमाद्यं। उ। कृतलब्धक्रीतकुशलाः इति कुशलार्थे। अणाद्विगोर्लु
गनपत्ये इति न लुक्। चतु[र्]र्विधा इति मध्यमपदलोपि समासस्याद्विगुत्वात्। अत एव विद्याचारंगक्षत्रधर्मं त्रिपूर्वे
उक्थादिगणसूत्रप्रसंगादाहरणं। वृत्तौ त्रैविद्य इत्युक्तं अध्येतारि चातुर्विद्ये क इति छ को गणपाभदपिन लुक्। कुमुदनडवे
तवसे। कथं पुरी माहिष्मती द्विषइति माघः। महिष्मान्वेति वक्तव्यमिति सनेन अतु पिमहिष्मती तिस्यात्। उ। महिष्मत्
स्यास्ताभवार्थे अण्। कुलकुक्षीग्रीवाभ्यः। कथं। सरला शक्तमातंगग्रैवेयस्फटितान्विषइति रघुः। अनेन ढकि ग्रैवेय
कमिति स्यात्। उ। ग्रीवादिभ्योऽण्चेति ढञि ग्रैवेयमिति। अणि तु ग्रैवमिति भवति। घुप्राग पागुद। कथं प्रपदिरे प्रा[.] क्तं
नजन्मविद्या इति कुमारः। अनेन यतो भावात्। उच्यते। अमया कालवचनादस्मात् परत्वात् घुघुला विदधती ति। कथं त
र्हि प्राच्याशुद्वित्ति चिति शास्त्रारंभेन्यासः। उ। साध्वर्थे यता। इञश्च। कथं पाणिनीयं शास्त्रं। पाणिनोऽपत्यमिति सणि
। गाग्र्यविदधि केशिगणिन श्चेति प्रकृतिभावे पाणिनः शब्दात् अपत्यार्थे इञि पाणिनिना प्रोक्तमित्यर्थे अनेन
अणाभाव्यं। उ। अणं तं नास्ति गोत्राधिकारात्। वृद्धस्य च पूजायामिति युवसंज्ञया चात्र गोत्रसंज्ञा वाध्यते। तथा च प्रो
क्तात् लुगित्यत्रोक्तं। पाणिनिना प्रोक्तमित्यर्थे वृद्धात् छे पाणिनीयमिति। यद्वा। पाणिनेन प्रोक्तमित्यणं तादेव छः। पा
णिनिरपि हि पाणिनोपत्यं भवत्येव। वृद्धाछः। कथं। कातीयश्चेष्टसिद्ध्ये इति। कतशब्दस्य वृद्धत्वात्। उ। कतशब्दात् गर्गा
दिपाठात्। यजियजिञोश्चेति फक्कि कात्यायन शब्दाद्वृद्धात्स्य इति छे विषयभूते फक्फिञोरन्यतरस्यामिति फालको
लुकि कातीयः। कात्यायनीय इति। धूमादिभ्यश्च। कथं दक्षिणापथीवृत्तिः। शैषे धूमादित्वात् वुञि दाक्षिणापथिकेति

भाष्यं ३। क्वचिदपवादविषयेप्युत्सर्गाः प्रवर्त्तते इति तस्येदमर्थे अण्। मनुष्यतत्स्थयोर्वुञ्। कथं सैंधवो मनुष्यः कच्छादे
।सिंधुशब्दात्तनुवृत्तौ अनेन वुञ् सैंधवक इति हि स्यात्। ३। अभिजनेर्थे सिंधुपकराभ्यां कन्निति मनुष्यवृत्ते रणञौ चेति
अणिञि वा। सैंधवः। महादि। कथं लुब्धोगापरव्यानादिस्पत्र स्वकीयस्य प्रसारव्यानमिति न्यासः। यतः कुजनस्य
परस्य चेत्युकं वृत्तौ ३। अत एव न्यासात स्वार्थिककन् प्रत्ययांतः स्वशब्दोत्र द्रष्टव्यः। परस्य चेति चकाराद्वा। स्वकुश
ब्दस्यापि अकच्। तथा च चांद्रसूत्रं। स्वपरजनदेवराज्ञां कुञ्क्षेति। केवलात्तु स्वशब्दादणि सौवमिति तथा छात्रादीनां चेत्स
नुवृत्तौ सौवमिक्षुरसाहृतं। स्वीयामिति तु तस्मै हितमित्यर्थे प्राक्क्रीताच्छः। नांतरीयकशब्दः स्यांतः शब्दाद्गहादित्वाल्ले
ननञ्समासे स्वार्थिककता पाठसामर्थ्यात् नञः प्रकृतिभावः॥ ॥इति दुर्घटवृत्तौ रक्तपादः॥ ॥युष्मदस्मदोरन्यत
रस्यां खञ् च। कलात्ठञ्। कथं अनुदितौष्पसनाग इति किरातः। तथा शार्वरस्य तमसो निषिद्धये इति कुमारः ३।
कालादिति योगविभागादण्। विभाषारोगातपयोरिति विभाषानुवृत्तेर्व्यवस्थितविभाषा लाद्वा अण्। क्वचिदपवाद
विषयेपीति वा। तस्येदमर्थे अण्। वृत्तिकाराद्यप्रतिपादितं वा प्रमाद एव वा। साम्यं चिरं प्राङ्क्ते। कथं सांप्रतिकाभावे भूत
पूर्वगतिरिति ३। असांप्रतिक इति निर्देशात्। अध्यात्मादिषु ~~पाठात् ठञि टिलोपः~~ ल्यात्ठञ्। इत्युक्तं तालक इसपिना
स्ति। अत एव निर्देशादिति। येषां चेसन्नरक्षितः। कथं। शाश्वतमनुधुवो निसह इसमरः ३। कालादिति योगविभागाद
ण्। अव्ययानामभमात्रे टिलोप इति तु नास्ति। बहिषष्टिलोपश्चेत्यनेनास्यानिति लाक्तापकात्। कथं। अकस्माद्भव आक
स्मिकं ३। अकस्मात् अव्ययात् विभक्तिप्रतिरूपकान्निपातात्। अध्यात्मादिपाठात् ठञि टिलोपः। कथं। इधतः पुरातन

दु० व०
३१
31

मुनेर्मुनिनामिति माघः। पुराणप्रोक्ते धिसने मधुघुर्लो बाधनात्। उच्यते अबाधकान्यपि निपातनानि भवन्तीति। घुघु
लौ च। बाधकान्येव निपातनानि भवन्तीति भाष्ये स्थितं। पुरातनमुनेरिसादमः कालदष्टा एवापशब्दा इति भागवृत्तिः।
नैतत्तथापतः पूर्वपदात्संज्ञायामग इत्यत्र भाष्य एवोक्तं। अणगयनादिभ्य इति निपातनात्। ऋगयनमिति सिद्धे अग
इति प्रतिषेधो ज्ञापयति। अबाधकान्यपि निपातनानि भवन्तीति। तथा च जांबवती विजये पाणिनोक्तं। आस्ति प्रतिच्यां
दिशि सागरस्य वेलोर्मिगूढो हि पयोलकुक्षौ। पुरातनी विश्वतपुण्यशब्दा महापुरा द्वारावती च नाम्ना इति द्वितीय
सर्गे। अनेन यत्रानुचितं धराधरैः पुरातनं माजलतामही क्षितां। ददर्श तं तु पुरतो जरंतमाविशीर्णशीमंत इवोद
धिश्रियः। इति चतुर्थे। त्वयासमसहायमर्जितं यच्च तच्च संख्यपुरातनं। चिरायचेतसि पुनस्तरुणीकृतमनघद्र सष्टा
दृशे। कैयटे तत्तु पृषोदरादित्वात्। सिद्धिरुक्ता। सर्वादीनि सर्वनामानीति सूत्रोक्तं। घञ्जगृब्राह्मणकः। शास्त्रे भवशास्त्री
म। घुत्तुलान्तकोभावात्। उ। ततआगतस्तस्येदमिति वा। अणतद्धिताश्छः एवंवार्त्तमिति च। अधिकृत्यकृते ग्रंथे। क
थं ज्योतिषंशास्त्रं अनेन अणा वृद्धिसंभवात्। उ। संज्ञापूर्वकस्य विधेरनित्यत्वात्वृद्ध्यभाव इति स्वभूतिः। ज्योतींषि
नक्षत्राण्यधिकृत्य संततीति गणनीयं त्वेनेत्सर्ग आदित्वादच्। साहचर्याध्रुवामनवदत्तास्थापितके भाषावृत्तिः। लवा स्थापिका
भ्य इत्यणो। लुकिवा। निस्यंदरूढशारादिभ्यः। कथं पुरीद्रक्ष्यथ कांचनीमिति च भट्टिः कांचनीचामसमयष्टिरिति मेघः।
वृद्धसंज्ञकत्वात् अपटाभाष्यं। तथा च। तेन श्रीगोविंदेनेदं कांचनमयं निर्मितं पुनरुत्तममिति वाल्मीकिः। उच्यते। क्वचिद
पवादविषयेप्युत्सर्गो अभिनिविशत इति अनुदात्तादेश्चेत्यपीति। उ। जातरूपेभ्यः इत्यत्र मैत्रेयः। कथं जगतोस्य ३१

जगन्मय इति चंडी। मयट्ङीपाभावं। उ। जगन्मयपते जानातीति मय मय धातोः पचाद्यचि अजादेराकृतिगणाट्टाप्। कथं आ
प्यं अम्मय इत्यमरः। नित्यमेकाचो शरादेरपीत्यस्तीति वचनादाद्यन्नयमित्यादि। वटपृशाटानि संभयटाभावं। उ। आप्यामिति प्र
माणपाठ इति व्यानशीलः। तद्धिता इति बहुवचननिर्देशाघञित्यन्यः। इति दुर्घटवृत्तौ चतुर्थस्य तृतीयः पादः॥ ॥ मागवहते ष्ठक्। समा
नोदरे। सोदराद्यः। कथं सहोदरस्यातिमदोद्धतस्येति भट्टिः। कथं अपथानं तु गच्छन्तं सोदरोऽपि विमुञ्चति। विभाषोदरे इति
सभावेन सोदर्य्य इत्येवं हि स्यात्। उ। समानस्य च्छन्दसीत्यत्र योगविभागेन साधुरिति सीमनघः। यद्वा। सहशब्दः समानार्थः
। तस्याच प्रयोगः। सर्वे ते सह जायन्त इति तेन सह समानमुदरमस्येति बोपसर्जनस्येति सभावे सोदर इति। यत्र भ्राता सहोदर
इति तु वाक्ये नासिद्धं॥ ॥ इति दुर्घटवृत्तौ चतुर्थोऽध्यायः॥ ॥ प्राक्क्रीताच्छः। आलन् विश्वजनः। कथं। पंचजनीयो विश्व
जनीयः। आभ्यां श्वप्रसंगात्। उ। विश्वजनादेः कर्मधारयादेवानमिति वचनात् षष्ठीसमासादौ प्राक्क्रीताच्छः। कथं।
सार्वजनीन इति। सर्वजनात्। उक्श्चेति वा तिकोरठञिपक्षे सार्वजनीक सर्वजनिनाभ्यां भवितव्यं। उ। प्रतिजनादिभ्यः ख
ञिति खञ्। असाधुर्वा चिरकालीनादयः। खः सर्वधुरादित्यत्र योगविभागेन। तेन तुल्यं क्रियाचेद्वतिः। कथं पुत्रं मित्र
वदाचरेदिति। क्रियातौल्याभावात्। उ। मित्रकर्मकाचरणाक्रियया तुल्यं यथा स्यात्। तथा पुत्रमाचरेदित्यर्थात्। क्रि
यातौल्यशाम्। कथं। पितृवत्स्थूलः पुत्र इति स्यान्निवसत्रेन्यासः। अत्र युक्तं। क्रियाग्रहणं गुणतौल्ये माभूदिति स्थूल
शब्दोयं धर्मप्राधान्यात् स्थौल्यवृत्तिः। एवं तत्र तस्येवेति। वतिः। पुत्र इति सप्तम्यन्तं। पितरि यत्स्थौल्यं तत् पुत्र इत्यर्थः।
यद्वा स्थूल इति विशेषणेन हेतुनिर्देशः। स्थौल्याद्धेतोर्गमनादिना पित्रा तुल्य इत्यर्थः। एवं चानेन वतिः। तस्य भावस्त्वतलौ।

कथं स्त्रीत्वं। पुंस्त्वं। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति अस्याभावात्। उ। आ च त्वादिति चकारात् त्वतलौ। यस्याः समस्तसुरता
समुदीरणेनेति चंडी। भावस्य समुदीरणायोगात् समूहे तु तलो भावात्। उच्यते। धर्मधर्मिणोरभेदोपचारात् धर्मी ग्राह्यः। क
थं। अस्ति त्वं मम त्वमिति प्रातिपदिकाधिकारात्। उच्यते। विभक्तिप्रतिरूपकनिपातत्वात्। कथं नानात्वं। अन्यथात्वं। यो
गपद्यपौनःपुण्यादय इति। असत्ववाचित्वात्। षष्ठीसंबंधाभावात्। उ। नानादयो अत्र नानाभूतवचनग्राह्याः। पृथ्व्यादि
भ्यः। इमनिजंताः स्वभावात्सुप्ति। तथा च प्रमनिजभावे कइसाघमरलिंगकारिका। एवं च कथं प्रेम स्नेहोथ दोहदमिति।
प्रियस्य भाव इतीमनि विप्रियस्थिरेति प्रादेशो प्रेमा इति भाव्यं। उ। प्रीच्यते। प्रीधातोर्मनिन् सर्वधातुभ्य इत्यनेन। कथं पौ
र्णमासीति तु पूर्णिमेति द्रव्यवचनत्वात्। उ। धृधातोर्भावे क्तस्ततो भाववचनादिमन्वक्तव्य इति। त्रेर्मप्निस्समिस्सूत्रवा
र्त्तिकेन इमन्। गुणवचनब्राह्म। कथं। वैरमिति। वीरस्य भावः कर्म वा इति ष्यञा भाव्यं। उ। द्वंद्वाद्वुन्वैरमैथुनिकयोरि
ति निर्देशात्। कथं। सहजचापलदोषसमुद्धत इति माघः। अत्र चपलशब्द इति पाठात् ष्यङ्भावात्। तथा च माघः। चाप
ल्यादयथ मरसत्सत्तरंगहस्तैरिति। उ। शिवादित्वादण्। सख्युर्यः। कथं। ततो निर्मुक्तो दौसेनेति चंडी। तथा वाणिज्यं वेति वक्तव्य इ
त्यमरः। स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी इति। ब्राह्मणादेः पाठात्। ष्यत्ष्यञ्प्रत्ययेन दौत्यमिति भाष्यवृत्तिः। इगंताच्च
ल। कथं कवेः कर्म काव्यं। अणा काव्यमिति हि स्यात्। उ। ब्राह्मणादित्वात् ष्यञ्। अथवा। कद्मुवर्णे इत्यस्मात् ऋहलोर्ण्यत्। कु
शाद्वेमनोहरत्वाद्दवश्यं कूपते इति ओरावश्यके इति ण्यद्वा। योपधाद्गुरुरूपो। कथं। साहाय्यं नु अञो भावात्। तथा च माघः॥
सहायकव्यग्रभुजं प्रसत्स्ले इति। उ। जयादिसमतेन साहाय्यमित्यपि न भवतीति भागवृत्तिः। दक्षमनो। कथं। गुरुलाघ ३२

वं।उ।षष्ठ्यायशब्दानां गुरुलाघवचिंतानास्तीति भाष्यकारवचनप्रामाण्यात्। पूर्वविप्रतिषेधेनेगंताच्चेत्सण्। घउत्तरपदस्यचेत्स
स्यविधिसूत्रलक्ष्मीकाराद्वृद्धिः। गुरुशब्देन धर्मवचनेनैवलाघवशब्दस्यकाद्वंद्वः॥ ॥इति दुर्घटवृत्तौ प्राक्कीतपादः॥ ॥धा
न्यानांभवनेक्षेत्रेखञ्। प्राणिस्थादातो। कथं। शिखी।उ। व्रीह्यादित्वादिति नान्। सिध्मादि। पश्यकथं। कुष्ठी। सिध्मादिषुउप
तापाच्चेति पाठात्।उ। दीर्घाताद्देवलवप्रत्यय इष्यते। ह्रस्वांताच्चद्वंद्वोपतापगर्ह्यादिभिः रजः कृष्णा। इदुपरिपूर्वात्सदः स
स्कृदिवेति क्विप्। सादिरप्रतेरिति षत्वेपरिषद्वद्वादलचूलथाचव्योषः। याशंप्रतिप्राक्परिषद्वलानामेति। एवंच
कथं। परिषद्वलान्महाब्रह्मैरिति भट्टिः। नचाक्षरत्वेन छंदोभंगात्।उ। नचाक्षरेणैकपादोवृत्तभेदोस्ति। यथाप्रधा
नेकर्मण्यभिहितेलादीनामृद्धिकर्मणामिति। तथा। तस्मैतिलोदकंदद्याद्पुत्रायभीष्मवर्मणे। एवंचा नछंदोभंग
इति भागवृत्तिः। पृषोदरादित्वादिकारलोपेएकदेशविकृतस्यानन्यत्वात्। पर्वशब्दात्तुबलजिति भाषावृत्तिः यद्वा॥
पर्शुरल्पेन इष्टतः श्रद्धभासांगादिति वाकुलकादिप्रत्ययेपर्षद्यत्र केचिदाचार्येणपाहिताः। केचित्सूर्वमुल
त्तंउभयमेतत्प्रमाणं उभयथाप्याचार्येण शिष्याणांप्रतिपादितत्वादिति। यथोक्तं। युवा खलती सत्रन्यासकृता
केचिज्जरतीभिरितिग्राहिताः उभयंप्रमाणं उभयथापिग्राहितत्वात् कथंरजोयुक्ताभूदित्यत्रनवलच्। उच्यते। इ
तिकरणानुवृत्तेः। ज्योत्स्ना। तमिस्रा। कथंज्योतिष्मतीतुषसंज्ञायांज्योत्स्ना। निपातनात्।उ। अन्यतरस्यांग्रहणा
नुवृत्तेर्मतुबपि। अत इनिठनौ। कथंहलंतत्वात्।उ। व्रीह्यादित्वात्। कथं। जातोसर्पिणी। एकाक्षरात्कृतेजातेः।
सप्तम्यांचनतौ स्मृतावितिवचनात्।उ। सर्पणंसर्पः। तद्योगात्। विनः। इतोनुजातेरस्त्री। विषयादिडिनी। बिसर्पी सेव

।अथवा एकाक्षरात्मकतइत्यादिवाच्यं।प्रयोगानुसारादितिकरणानुवृत्तिसाध्यं।अतःप्रयोगदर्शनात्कचित्तोभव
तः।।पठीपठीयात्।पठीशब्दोपठनंपठः।भावेघञ्।संज्ञापूर्वकत्वात्।वृद्ध्यभावःअतइतिनित्यवीप्सयोरितिद्वि
त्वं।पठीपठीयद्वाबहुलमाभीक्ष्णेणिनिः।वृद्ध्यभावःपूर्ववदेव।आभीक्ष्णेद्वेभवतइतिद्वित्वं।इमाचलक्ष्मीवान्।इ
न्दुलक्ष्मीश्चलाक्षामानमाजलत्विंत्सजेद्विरेइतिभागुरिः।एवमपठीति।व्याप्तशीलत्तूणादिवृत्तौइः।कृव्यादिभ्यइति
।किं।अपादिर्भारवाहकइत्याह।कथमश्रावीप्रत्ययः।प्रमाणेद्वयसज्जिष्त्रोक्तं।उच्यते।अपोविषयेघञ्।बहुल
वचनादिति।एवंचश्रवणंश्रावःइतिघञंतात्पूर्ववदिनिः।यद्वा।श्रावयतीतिश्रावीआवश्यकेणिनिः।शब्दश्चोच्चार्य
माणआत्मानंश्रावयति।कथंगुर्विणी।उ।गुरुत्वंभवतीतिइतिव्या।वित्यतः।।क्विपिवा।लिसोपेकृन्नेभ्योङीपिगुरुरू
द्रेअस्याःस्ती।व्रीह्यादीनिर्वा।व्रीह्यादिभ्यश्च।कथंमालिकः।व्रीह्यादौशिखादिभ्यइतिरेवेतिवचनात्।इनिमत्वपावेव
।माली।मालावानित्येवं।भवति।उ।मालापण्यमस्येतितदस्यपण्यमितिठक्।रूढादिभ्यइलच्च।कथंजेहालेतुवां
बभूवुविपानाजन्यसत्तामपीतिमुरारिः।तुन्दादित्वादिलच्।विजिह्वलइतिभाष्यं।उ।स्वांगाद्वृद्धौवेति।गणसूत्रात्लबद्धि
ताजिह्वायस्यसजिह्वलः।वाचालत्सुजिह्वालः।प्राणिस्थादातइतिलवि।एकगोपूर्वात्।आनित्यं।कथं।एकदेशीअ
वयवीतिवृत्तिः।पूर्वनिपातव्यभिचारादस्यानित्यत्वादिनिः।ननुकर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टोलघुत्वादिका
तीयन्यायान्नात्रेनिः।उ।यत्रबहुव्रीहिमत्वर्थीययोरेकार्थतानत्रायन्यायः।इहत्वेकांदेशोऽस्येतिबहुव्रीहिणाअव
यवएवप्रतीयतेनायतनावयवी।यथालोहितशालिमान्ग्रामइत्यादौ।नायंन्यायइत्यपरसूत्रेऽनुन्यासः।यद्येवंक ३३

थं। अटूठ णिस्यत्र अत्र विशिष्टो अनुबंधवशाद् इति न्यासः। तथा हेतुमति चेत्यत्र भिक्षा हि प्रचुरान्नरसं इत्यादि कोजनयता
इति। तथा विशेषणमत्रे अनेकप्रकारवदस्त्विति। मनुष्यत्रेच उकारानुबंधवत्त्वात् प्रातिपदिकमिति। तथा विशाकिउ लयच्छेद
पाथेयवंतइति मेघः। फलवत्सृगमालिनेति रघुः। लघुत्तरा संगवती निवातिनीमिति कुमारः। वकुत्री हि मत्वर्थीयमयोः
समानार्थत्वात्। उ। एकीयमतं तु। येतु लाघवार्थतानुमन्यंते तन्मते नैते प्रयोगाः। रक्षितस्तु वकुत्री हे रेकशब्दादिनिः
। ठञ् च नास्ति। सहलिकरणानुवृत्तेः कर्मधारयादेवेष्यत इत्याह। अस्मायामेधा। कथं सरस्वान्। अर्णवः सरस्वती।
पयस्वानिति अनेन विधेर्भावात्। उ। तस्मैमत्वर्थे इत्यत्र पयस्वान् इति भाष्योदाहरणात्। एकगो पूर्वादित्यतः परेणा
पि मतुप् समुच्चीयत इति भाषावृत्तिः। कथं। भवेति मायाविभुवेन मायिन इति भारविः। तथा जातवेदो मुखान्मायी
ति कुमारः। उ। व्रीह्या। दिपाठादिनिरपि। फलव। कथं फलवान्फलिनः फली इत्यमरः। अनेन नित्यमिति भाव्यं। उ।
वकुलग्रहणानुवृत्तेः। दंडोपतापा। कथं दुर्वर्णवती कन्येति। अनेन नित्यमिति प्राप्ते। उ। ठन्। दैर्वाधकः। चकारान्म
तुप् समुच्चीयत इत्येके॥ ॥इति दुर्घटवृत्तौ धान्यपादः॥ ॥प्राक् दिशो विभक्तिः। सर्वैकान्य। किं यत्तदः काले दा। कथं तं
त्रदिवसं इत्यत्र दाप्रसंगः। उ। अंतरगत्वात् कालसामान्येन स्येष्यमाणत्वात्। कालविभागे चानहोरात्राणामित्यत्र रक्षि
तः। इदमस्थमुः। कथं इत्थं प्रकारमापन्नः। इत्थंभूतलक्षणनिर्देशात् द्वितीयानादेमिष्यते। दक्षिणादाच्। कथं दक्षि
णापथः। उ। आवंतस्यैव पथि शब्देन समासात्। एवं यशास्यं दक्षिणापथः। एवं उत्तरापथः। उत्तरामुखमिति च। अस्त्री
ति च। कथं। पश्चा मितामित इतः पुरतश्च पश्चादिति भवभूतिः। पुरः परतोग्रत इत्यमरः। तथा। पुरतः प्रथमे चाग्र

तद्इति विश्वप्रकाशः। चिरस्य मिति भाषावृत्तिः। यद्वा। पुरास्तिष्ठतीति प्रातिपदिकात्स्वार्थे इति णिच्। टिलोपेपचाद्यच्। आया
३४ दिलान्तासिः। पुरोवर्त्तिनीमित्यर्थः। याप्येपाशप्। कथं। रक्षःपाशानितिभट्टिः। क्रियागुणमोर्निर्दिष्टयोगात्। उ। अत्रापिरा
34 क्षसक्रियानिंद्यते। द्विर्वचनवि। कथं गोतरः। क्रियागुणाभावात्। नोहिप्रकृष्यते। उ। गोत्वगुणप्रकर्षतरबत्र। प्रका
रवचनेजा। कथमेकजातीयासंख्याविधार्थेधाइतिधाप्रत्ययेन बाधितत्वात्। उ। गुणद्रव्यप्रकारे जातीयर्। क्रियाप्र
कारेतु धाप्रत्ययइष्यते। वाच्यद्वूनां जाति। कथं। कतमोभवतां देवदत्तः। जातेजिहप्रश्नाभावात्। उ। कतरेकतमौ जा
तिपरिप्रश्नइतिग्रहणात्। अन्यस्मादिपिभवति॥ ॥इतिदुर्घटवृत्तौ विभक्तिपादः॥ ॥पादशानस्यसंख्यादेर्वीप्सायां वुन्
लोपश्च। अषडक्षा। शीन। कथं अस्मास्वधीनं किंमुनिः स्पृहाणामितिभारविः। केवलादधिशब्दात् खप्रत्ययाभावा
त्। उ। अग्नमधिगतोऽधीनइति। आयत्तपर्यायोऽसि। यस्मायं प्रयोगो वार्त्तिके। वाक्यं च रूप्यधीनमितिभाषावृत्तिः।
तथाच। अधीनोनिघ्नआयत्तइत्यमरः। यद्वा। धीङ् अनादरे इति दैवादिकात्तिवायां नञ्समासे आदन्तार्थ एव। अथ
वा। अस्मास्वधीतिसप्तमीशौण्डेरितिसमासेबहुलवचनाद्लुकि खप्रत्ययः। किमेत्तिङव्यय कथं उच्चैस्तरां वक्ष्य
तिशैलराजइतिकुमारः। शिरोविशेषणत्वेनद्रव्यप्रकर्षात्। उ। वक्ष्यतीतिक्रियाविशेषणत्वात्। यावादिभ्यः। कथं। सा
कंदुकैः। कृत्रिमपुत्रकेशेतिकुमारः। पुत्रात्कृत्रिमइतिगणसूत्रात्कनैवकृत्रिमार्थोलब्धः। कृतिमग्रहणानर्थक्या
त्। उ। अनुकंपाद्यर्थकना। अनुकंपाद्यर्थोविपुत्रकशब्दः। स्तितम द्योतनाय कृत्रिमग्रहणं। अपादानेच। कथं। आ
दर्शनान्यंभरथं चलत्तः। इतिभट्टिः। केनसंविद्रत्नेनान्यस्त्वत्तोभक्तिवतइति। अन्यारादितिदिग्लुपपदपंचमीधात्। 

उ। तसिरिति। योगविभागात् आपादिभ्य उपसंख्यानमिति वा। सुखप्रिया। कथं शीलामूर्त्तेर्मुखाब्जभवेति भट्टिः।
घञ्इस्तु वृत्तेः। उ। अपपाठ एवायं। मुखाकुर्वीति पाठ आद्यः। अपूप्र सन्चव। कथं। नीचः। उ। न्यंचतीति न्य
क्। न्यगेव नीचः। पञ्चनाभाद्यार्थाद् ञिति योगविभागाद् च। ब्रह्महा स्तिभ्यां। कथं। अस्माकमपि ब्रह्मवर्च
सं न विभोष्यतीति भोष्यतीति मुरारिः। उ। समासांतविधेरनित्यत्वात्। तत्पुरुषस्या। कथं ग्रामे कांसु वर्णमेकं
वा भूमेरप्यर्धमंगुलमिति। तथा चोक्तं सिता चूर्णिरंगुलान्येकविंशतिरिति। केवलादंगुलशब्दात् अचो भावा
त्। उ। अंगुलिभिरस्य परिच्छेदिका वियतइति अर्शआदित्वादच्। एवं चांगुलिपरिच्छिन्नो भागो अंगुलः। राजाहःसखिभ्यः। क
थं वायुसखा। उ। बहुव्रीहिणा। कथमष्टागामिव वर्त्तमाना हर्म्ययुक्तायां निशि पक्षिणी। विशेषणसमासात् टचाभावं। उ।
आगमे वर्त्तमाने अहनी यस्याष्टप्रहरस्येति बहुव्रीहिः। समासांतविधेरनित्यत्वात् वा। रोः सुपीति रेफादेशात् हवि
चे सुत्वं न भवति। अनश्च। कथं। यद्यह नाथनाथास्येविनाभिका। नस कौटिल्य इत्यस्य पचाद्यचि इति धातुप्रदीपटी
का। कथं। अनाभिको बालः। अनुनासिका वर्णाः सुखनासिका वचनो अनुनासिक इति निर्देशादस्यानित्यत्वात्। धनु
षश्च। कथं। सलावण्याशं साधु तधनुष समहूप तणव दिति महिम्नस्तोत्रे। उ। समासांतविधेरनित्यत्वात्। वासंत्राया
मित्यनुवृत्तेर्व्यवस्थितविभाषा। विज्ञानाद्वा सिंहावलोकनन्यायेन। गंधस्येदुत्पू। कथं। क्रांतकांतवदनप्रतिबि
बे भग्नबालसहकारसुगंधौ इति माघः। तदेकांतग्रहणं कर्त्तव्यमिति वचनात् गंधस्यावयवे तस्याभाविकत्वे इत्य
ह समविधानात्। उ। भग्नबालसहकारसुगंधे इत्साधः। माढः सुगंधाविति प्रमादपाठ एव। लक्ष्यपरतंत्रत्वात् सापि कं

दुर्घ० वृ० वार्त्तिकमिसन्धः। यथा एवंचानियोगस्समप्राप्तिकं रक्षितेनोक्तं। महीभृतः पुष्पसुगंधीरादद इति भारवेर्व्याख्यायामुक्तं प्रा वि।
३५ गवस्थातोऽन्यदीपगंधस्य संपादना इंधः। तेनारविंदगंधिर्भवति बंगवाश्चेतिभट्टिः। व्याख्यातेजयमंगलायां यदुक्तगंधस्ये
त त्यादि। नाइकारोनभवति। तत्रैदेकांतग्रहणादिति तद्याहृतं स्यात्। वयसिदंतस्य कथं। सादक्षरोषात्सुदतीचतत्रवा
35 लापदेन विशेषिता। वालेवाले जिगीयते यावत् षोडशवत्सर इति। तथा च। वालो यून षोडश इति स्मृतेश्च पंचदशवर्षी
योभण्यते। एवं चात्रापि यौवनं गम्यत एव। तद्युतश्च। कथंवरतनुसंप्रवंतीति। नदीसंज्ञकत्वतनुशब्दोयं अंबार्थनद्यो
र्ह्रस्व इति विधानात्। एवं च निसं कप् स्यात्। उ। समासांतविधेरनित्यत्वादितिवाच्यं। एवं च सुतनु सज्यमलंकरणा
यते। तथा ननु सुतनु मनुयानं जानुयांतीमितिमाघः॥ ॥इति दुर्घटवृत्तौ पंचमोध्यायः॥ ॥एकाचोद्वे प्रथमस्य। श्लो
कयं। आदध्यादधकारतिमतिमतिशयनीमितिमयूरः। आबिलिङिः श्लाघभावात्। उ। दधधारणइत्यतः आत्मू
नेपदानित्यत्वादित्युक्तं प्राक्। आधेयादितिवापाठः कर्त्तव्यः। वचिस्वपियज्। कथं उवाह रक्तं पुरुषा इति चंडी। उ। भूयादे
राकृतिगणत्वात्। तत्रवहिः प्रकृत्यंतरमप्यस्ति वाहृप्रयत्नेइत्यस्यात्मनेपदनित्यत्वाद्वा। कथं यष्टिः। यजेः क्तिनि क्तिचि
वा न संप्रसारणं उ। शक्तियष्ट्योरीकक् इति निर्देशात्। कथं वाव्यतीति क्विब्वचिप्रच्छी त्यादिना क्विप् संनियोगेन संप्रसार
णात्। कश्चाप्येकदेशविकृतत्वात्संप्रसारणप्रसंगात्। उ। साहचर्याद्विकृतविग्रहणात्। कश्चाप्येकदेशविकृतत्वात्सं
प्रसारणप्रसंगात् उ। साहचर्याद् चिकृतविग्रहणात्। कश्चाप्येकदेशविकृतत्वात्संप्रसारणप्रसंगात्। उ। साहचर्यादवि
कृतवचिग्रहणात्। म क्रोशशब्दांतरत्वाद्वा। कथंकर्णवेधा। यथादेवेइस्समरः। उ। वधवधानेयजिअनेकार्थत्वात्। श्वत

पाके। कथं मृतं धान्यपटोलयोरिति। क्षीरहविषोर्नित्यं व्यवस्थितविभाषात्वात् अन्यत्र नैवेति। वार्तिकात्। उच्यते। व्यवस्थि
तविभाषात्वात् क्वचिदन्यत्रापि भविष्यतीति पक्वमिति वा पाठः। पाके क्षीराज्यपयसामिति चान्द्रः। आदेच। उ। कथं। कृत्तवः
मतकाक्रूप इति आक्र्यते अननेति पुंसि संज्ञायामिति घो आत्वभावात्। उ। फगाशब्द इति दिवादौ पठितव्ये। कैगैशब्द
इति भूवादौ पाठात् ज्ञापकात् आत्वमनित्यमिति ज्ञापकसमुच्चयः। पृषोदरादिपाठाद्वा आत्वाभाव इति केचित्। पद्न्नो
मा। कथं माघे मासिरन्त्यापद इति। छन्दसीत्यनुवृत्तेः। उ। भाषायामपीष्यत इति वृत्तिः। एवं च पद्भ्यामरद्वारशिष्यमिति
भट्टिः। व्यायामे क्षुण गात्रस्य पद्भ्यामुद्वर्तितस्य च इति पूद्दश ब्दोयं पादपर्याय इति रक्षितः। लोपो व्योः। कथं अल स्वर
मा इत्यमरः। अविरवीत्यतः श्रृण्वं विभ्यो ल इति लप्रत्यये वलोपात्। उ। पकारसाहचर्यात् धातवीय वलोपः। अस्य पवर्ग
ति गणे पाठः। कथं तर्हि वृश्चक इति। उ। वृश्चव्रीहि। व्रस्तहलादौ तु प्रतिषेधादिति भाषावृत्तिः। असिद्धवहिरंगमंतरं
गे इति। शपो सिद्धत्वे वलोपात्। उ। शपो असिद्धत्वे वकारस्यैवाभावात्। हल्ङ्याभ्यो दी। कथं। अर्धपिपिप्पलीप्रत्यय
ग्रहणभावया मङ्ग्यावंतादेव सुपो अभावात्। उच्यते। तत्र दीर्घग्रहणात् तत्तत्रतद्यादितदंत नियमः। तद्धिनिः कौशांविदि
त्यापर्थ्यमिति रक्षितः। आकुणः। कथं। दाध गुहां पश्य उलूकपूर्णां इति उच्यते। संहितायामित्यनुवृत्तेर्नासंहितायां। क
थं आउदकान्ते पार्थं प्रियमनुनुव्रजेदिति संहितैकपदे नित्येति शाक्ते षष्ठ्येरीकगिति दीर्घोच्चारणात्। तथा चोपसर्गा
त्स्वउहते रित्यत्र रक्षितेनोक्तं संहितैकपदे नित्या इत्यादि प्रायिकमिदं ओदकान्तमिति वा पाठः। वृद्धिरेचि। कथं शुद्धो
द इति। उ। शाकंध्वादित्वात्। कथं। त्वादृक्षु मुसकतीमति युंजयतो। उ। असंहितायां भविष्यति। ओतोम्शासोः। कथं।

त्रियुं प्रति स्थानिवत्त्वादात्वप्रसंगात्। उ। अनल्विधाविति निषेधात् न स्थानिवत्त्वं। अकः सवर्णे कथं। नैष अध्ययनस्य स
मय इति। कर्मणा यमभिप्रैती सत्रवाभिप्रयणमभिप्राप इति न्यासः। उ। गतिकारकोपपदानामिति सुपः प्राक् समासे परत्
र्वत्वं। कथं तर्हि तपोवनं प्राध्ययनाभिभूतं समुत्थं स्वारूपतत्र क्विंजनं इति भट्टिः। उ। तत्पुरुषे कृति बहुलमिति ज्ञापकात्।
प्रा पिकं गतिकारकोपपदानामिति रक्षितः। कथं अधीयेते। दीर्घे कृते इयङाभाव्यं। अधियत इति स्यात्। उ। नेन्द्रस्य प
रस्येति ज्ञापकात् पूर्वोत्तरयोस्ताव त्का र्थ्यं। पश्चादेकादेश इति। वर्णादांगं बलीय इति वा इयङ् दीर्घत्वं। सार्वधातुक
मपिदिस त्र-व्यवं ते प्रस्तावे न्यासकृता माश्रयेपीयं स्वीकृता। विप्रतिषेध इत्यत्र मैत्रेयेणाप्युक्तं लक्ष्यवशात् क्वचित्पा
श्रये प्येषा प्रवर्त्तते। प्रत्ययप्रत्यादाविति। कथं। धन्वंतरिः। समसनमर्द्धसनमिति। उच्यते। शाकंध्वादिः कथं। पुरोक्षं
अक्षणः परं परोक्षमिति प्राप्नोति। अव्ययीभावे शरत्प्रभृतिभ्यष्टच्। उच्यते। परोक्षे लिडिति निर्देशात् शरत्प्रभृतो न्या
सः। प्रथमयोः पू। कथं देवो यातीति। उ। लेकृते अनेन दीर्घात्। उ। नादिचीति निषेधात्। संप्रसार। कथं। विव्ययोर्द्देवा नि
ति भट्टिः। नव्यो लिटी त्यत्र निषेधेप्यनेन पररूपत्वात्। अत एव संवृत्युरवरवका। सिचमूसमुत्थमिति माघः। उ। चिंत्वं।
संज्ञापूर्वको विधिरनित्य इति संप्रसारणाभावः। ऋत उत्। कथं जागरो विचिण लुङि। स्विति अनेन जागुरिति स्यात्। यथो
षविद्रजागुरिति अत एव निर्द्देशान्नावश्यं लक्ष्ये लक्षण प्रवर्त्तते। लक्ष्यपरतंत्रत्वात् शास्त्रस्येति वावाच्यं। ख्यत्यात्पा क
थं परकः संख्यास्त्वव सह मयेति मेघः। विकृत निर्द्देशादनेन भाव्यं। उ। विकृतानिर्द्देशस्य किं वं नेकृतार्थत्वादिति इह परत्वा
दणघा इत्यटा भाव्यं। दिक उत्। कथं। दिवौकस इति। उ। लेकृते पूर्वोत्तरयोर्यणि घोक इति स्यात्। उ। शब्दपरविप्रतिषेधात्। ३६

उकारस्यप। णित्वमितिरक्षितः। अचः परस्मिन्पूर्वविधावितिस्थानिवद्भावादिकारस्य नयणम्। सकृद्गतौ विप्रतिषेधे इति न्या
मात्। चार्द्रेः घृतोदरादित्वाद्दुत्वाभाव इष्यते। अत एव अन्ये दिवौकस इति अपि। अकारान्तोपि दिवशब्दोऽस्ति। इदं पुरं
तेन विसर्जितं वनं वनं चतंतेन समान्वितं पुरं प्रशोभते तेन। हीनो विनापुरं मरुत्वतारत्नवन्वे यथा दिवइ सश्वद्योषप्र
योगात्। स्वं दिवं नभ इ समरः। तेनवा दिवौकस इति। कनिप्रसयां तेन दिवन्। दिवा आको येषामिति भागवृत्तिः। एतत्त
दोः। कथं। मोवाकं वलविक्रयी। अनेन सलोपात्। सद्ववस्य स्योवाकं वलविक्रयीति पाठः। कर्त्तव्यः। यद्यपि न्यक्ष
वः छांदस इति वृत्तिः। तथापि छांदसा अपि क्वचिद्भाषायां प्रयुज्यंत इति संप्रदायः। कथमानिन्याः सर्वसंस्काराः।
तथा सर्वसंस्कृतं अरिसमितिकार्यपर्यायत्वात्। अप्सुसन्नो वायमिति भाषावृत्तिः। सुट्कात्पूर्वं इति विधिश्चाधि
कारस्व इत्यन्वयः। यथा। शोषे॥ ॥इतिदुर्घटवृत्तौ एकाचोपादः॥ ॥अलुगुत्तरपदे। ओजः सहो। कथं सततनैशतमोवृ
तमिति भारविः। अनेनतती यायाअलुक्सप्रसंगात्।उ। यते रुपधलक्षणे के कृते नैशतमो वृतं वर्त्तमानमस्येति रक्षि
तः। यद्वा ग्रहणवता प्रातिपदिकेन तदंतविधेर्निषेधात् रेशाब्देन समासे अलुग् नास्त्येव पदांगाधिकारे तस्य तदु
त्तरपदस्येति साक्षात्सदाधिकारे अत एवेष्टकीशीसत्रइष्टकादिभिस्तदंतविधिरित्युक्तरलुक्कं। यदि पूर्वपदभूतं
यत् तमः। तत्र अलुक् न तु यत्र तमोनमितिभाषावृत्तिः। आनङ्। कथं अध्येतृत्वे दिसत्रो रुत्सनस्येति प्रोक्ता लुगि
त्यत्र वृत्तिः। तथैव तारो वितिमीमां सकप्रयोगः।उ। विध्यास्तं वेन्ध्यस्या विद। क्षितलान्मात्रानङ्। विवक्षा हि शब्दप्रवृ
त्तेः प्रधानं कारणमिति तदाघाविरघासाया मिसत्रे द्वाम्यनामापितं। होतृपोतृनेष्टोद्गातार इत्सत्र मध्यमपदे पर आ

दुर्घ०वृ० ३७ 37

नञ्ः नास्ति समासे सर्वो सपदमुत्तरपदमिति पूर्वाचार्य्यप्रसिद्ध्यनुसारणात्। अत एव नैककीर्त्तिरिति त्रिपदसमासे लोपाभाव
इति रक्षितः। कथं पौत्री दुहितात्मजाविति त्रिकाण्डशेषः। ऋतइत्सनुवृत्तेः ऋतान्तद्वन्द्वस्य ग्रहणात्। उ। असाधुरेवायम्। पुत्रेन्यत
रस्यामित्यनुवृत्तेः पुत्रशब्दस्यार्थग्रहणादिति कश्चित् तन्न। अतिप्रसंगात्। द्यावापृथिव्यानलाञ्च। देवता। कथं रविचन्द्रावपि नोप
लक्षिताविति घटकर्प्परः। उद्वन्द्वग्रहणेऽनुवर्त्तमाने पुनर्द्वन्द्वग्रहणं चेदप्रसिद्धस्य ग्रहणार्थम्। नचरविचन्द्रयोर्द्वन्द्वो वेदेप्रसि
द्ध इति रक्षितः। इदमग्नेः सोम कथमुत्तरकाण्डे एवमत्त निश्चयं कृत्वा संप्रगृह्य कुशीलवौ इति। तथा च भविष्युत्तरकाण्डमाज
गतुस्तौ कुशीलवौ। अत्र कुशलवयोरनन्तभावात्। उ। इति सर्वसारीघैर्णा। सिद्धे इद्धि धानमन्यत्र। यथास्यादित्येवमर्थमिति
। तेनेह कुशीलवावित्यत्र इत्वं सिद्धमिति भाषावृत्तिः। नच्चैवं मुनिः कुशलवावेव चकार। किलनामइति रघुनसंगच्छत इति
। रामइति कुशलयो रूपमापइति सुबंधुः। विभाषास्वसपत्योरित्यतो विभाषानुवृत्तेर्व्यवस्थितविभाषात्वादितिष्कचित्ले
ति॥ ॥स्त्रियाः। कथं। दृढभक्तिरस्मूरस्भ्वेति। भक्तिशब्दस्य प्रियादौ पाठान्निषेधात्। उ। अस्वां पदस्य विवक्षितत्वादिवि
वृत्तिः। दृढंभक्तिरस्येति वाक्यं पदसंस्कारे। एवमाशीलष्टप्रियः। वियुक्तकान्त इत्यादि। कथमेकोहं भवतीसुतक्षामकरोमा
तः किमन्तो वयं इति वेणी। भवतीप्रसादादिति चंडी। सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनात्। उ। पुंवत्त इति योगविभा
गादिति साध्यम्। इदं कावित्येव अत एव वृत्तौ न लिखितं। एवेच्चानियोगे इति वत्प्रापिकत्वात्। तसिलादि। कथं सखीत्वं स
द्विरक्षणी यमिति। तन्वीत्वमिति च। उ। नकोपधाया इत्यत्र नेति योगविभागात् पुंवत्। कथं गौरीब्राह्मणीतरेति। सुपि
ङंतमित्यत्र वृत्तिः। गौरत्वं स्त्रीपुंसयोः प्रवृत्तिनिमित्तं। सामानाधिकरण्य माकृतौ भाविनः पुंस्कत्वात् मुंवलप्रसंगात्। उ। पटुगौरी ३७

त्तिपुंयोग निमित्तं स्त्रीप्रत्ययस्तदेवमयुक्तमन्यथा तुगौरखरा लणितरेति रक्षितः। महाष्टम्यादौ पुंवत्त्वमपूरणा प्रियादिष्विति तस्या
ननुवृत्तेः। आन्महतः। कथं महती प्रिय। लिंग विशिष्टपरिभाषया आत्वस्याभावात्। उ। घटघटीशब्देनास्यानित्यत्वात्।
द्व्यष्टनः सं। कथं संदेहद्वापरौ चार्थे त्यमरः। परशब्दस्य संख्यावाचित्वात्। उ। आन्महत इत्यादिति। योगविभागात्। अतए
व रुद्राश्चैकादशास्मृता इति। कुशी दशौकादशेति निपातनाद्वा। सप्तविंशतिमौक्तिकैरिति तु योगविभागादेवा। अन्येषा
मपि दृश्यत इति दीर्घेण वेति वृद्धमुवंते। कथं पूर्वमुखः। पश्चिमामुखः। दक्षिणापथ उत्तरापथ इति। उ। मध्यदेशाद्दक्षि
णेपथ्या स्तत्स्येति बहुव्रीहौ। यद्वा दक्षिणा च उत्तरा चेति दिक्षु सर्वे इति समासः। ड्यापो संज्ञा। कथं वेदेहि वत्सो हृदयं
विदद्धे इति रघुः। असंज्ञात्वात्। उ। बहुलवचनात् संज्ञायामपि। आतपवर्मप्रदवनमत्तः पुरो वितमित्यमरः। अथवा प्र
महायदनप्रमदवनमिति समासः। यदा तु प्रमदायावनमिति समासस्तदा। प्रविष्टः प्रमदावनमिति भट्टिः। द्विधा। कथं जा
तेरेकत्वात्परिभाषायाः स्वरूपविषयत्वात् संज्ञायामसंभवात् अदस्येवोदाहरणादीति वृत्तिव्याख्यानात्। उ। सामा
न्योपक्रमेण स्त्रीत्वस्याविवक्षितत्वात्। उपधोपत्वादिति तु उपदधातीत्युपधः। आतश्चोपसर्ग इति कः। उपधायाः। उपधा
या उपध इत्येव सिध्यति। अनुपधत्वादिति तु धिन्विकृण्व्योरच्चेत्यत्र न्यासे प्रमाद एव। अहृद्धिमदङ्गं। कथमाद्यं सुकर
मिति। व्यवधाने सुमा। उ। कृञः हृणे गतिकारकपूर्वस्यापीति का। कारकपूर्वस्यापीति वचनात्। कथं धुरंधरः। मुमो लक्षणा
भावात्। कथमर्धदिनार्धसंतप्तः सरसी गाहते गज इति। लक्षणाभावात्। चंद्रगोभिति मध्यस्य दिन इति सूत्रितत्वात्।
उ। पृषोदरादित्वात्। नम्राणतया। कथं नाम स्यश्वदस्तश्वतावेतावश्विनीसुतावितिः। तथा नासत्यावश्विनौ दस्रावाश्वि

